THE INSTITUTE FOR ADVANCED STUDIES OF WORLD RELIGIONS

FILM—STRIP NO. MBB—1971— 24-23

BUDDHIST SANSKRIT MANUSCRIPTS

IASWR

MICROFILM PROJECT MBB 11

~~MBB-1974-24~~
1. Film strip number

5
2. Source

SPHUṬĀRTHĀ
3. Title

ABHIDHARMAKOŚAVYĀKYĀ

4. Additional title, shortened forms of title etc.

N. S. + 880 = A. D.
5. Year in which MS was copied (Nepali Samvat and Christian Era)

6. Name of cribe

NEPALĪ PAPER
7. Material (Palm leaf, etc.)

NEWĀRĪ
8. Script

30 cm. x 14 cm
9. Size

12
10. Lines to a page

318
11. Number of leaves in complete work

12. [illegible] Missing leaves

YAŚOMITRA
13. Author and Date of composition (if given)

5
14. Number of Chapters

15. Remarks This is commentary of ABHIDHARMAKOŚA by VASUBANDHU. In this text has two hand-writings compare with MS. NO. Title has no Chapter has no title.

Jun 15, 1974
Date Photographed

अभिधर्मको
श

ॐ नमो मानवलप्रमथनाय ॥ ॥ यः सर्वथा सर्वहतान्धकारः संसारपंकाज्जगदुज्जहार ॥ तस्मै नमस्कृत्य यथार्थशास्त्रे
शास्त्रं प्रवक्ष्याम्यभिधर्मकोशं ॥ १ ॥ महाबलो ज्ञानसमाधिदन्ताय: पङ्क्रेजन्ममयंविदार्य ॥ विवर्ण निर्वृत्स्फुटबीप्रशा
कं तं शास्तृनागं शिरसा नमामि ॥ २ ॥
परमार्थशास्त्रकृत्याकुर्वीधं शास्त्रकृत्स्नमिव लोके ॥ यं बुद्धिमतामग्र्यं द्वितीयमिव बुद्धमित्याहुः ॥ तेन वसुबन्धुनाम्नाभिविष्यसत
मार्थबन्धुना जगतः ॥ अभिधर्मप्रत्यासः कृतोऽयमभिधर्मकोशाख्यः ॥ अभिधर्मसागरसमुद्धृतस्यास्य शास्त्ररत्नस्य व्याख्याम
या कृतेयं यथार्थनामा स्फुटार्थेति ॥ गुणमतिवसुमित्राद्यव्याख्याकारैः पदार्थविवृतिर्या सुकृता साभिमतामलिखिता च तथायमर्थ
श्चेति ॥ सिद्धान्तार्थापसृतं किंचित्कथानुगैः कृता व्याख्या ॥ तन्मूलत्वयथावद्विहितं हमयान्यथा व्याख्या ॥ अभिधर्मविलापायां कृतत्रम
यत्नाभिधर्मकोशस्य च ॥ प्रविचार्यतामियं तेर्व्याख्या युक्ता न वा युक्ता ॥ युक्ता चेद्ग्राह्येयं न वदया स्यादन्यथा विधातव्या ॥ न हि विषयमर्थं स्वबलि १
तुं न समर्थं तन्माहशां बुद्धिः ॥ ॥ इह शास्त्रारम्भकः स्वार्थं विवृद्धानन्त्वाचार्य्य आह ॥ शास्त्रं प्रणेतुकामः स्वस्य शास्तुर्माहात्म्यज्ञापनार्थं गु
णाख्यानपूर्वकं तस्मै नमस्कारमारभते इति ॥ शास्त्रमभिधर्मकोशं प्रणेतुकामः कर्तुकामः ॥ स्वस्य शास्तुरात्मीयस्य शास्तुः सहितगवा
नाचार्य्यस्यात्मीयः शास्तात्कीसनप्रतिपन्नत्वात् ॥ तनवाशस्त्रामहाकरुणपरतन्त्रुक्षसकलालोकः स्वस्वनपरिगृहीतः ॥ तस्मादाचा
र्यस्यापि स्वत्वेन गृहीतस्य सत्तगवाःस्वः शास्ता भवति ॥ माहात्म्यज्ञापनार्थमिति ॥ महात्मत्वं माहात्म्यं स्वपरार्थप्रतिपत्तिसम्पन्नत्वज्ञाप

नार्थं तदेवबाधार्थं ॥ गुरुव्याख्यानपूर्वकं · गुरुकथनपूर्वकं ॥ तस्मै नमस्कारमात्ररतः · तस्मै प्रह्वमंसकत्वात् इत्यर्थः ॥ अतीतकालस्यादानध्ववानि
ति ॥ वक्ष्यवर्त्तमानकालवदप्रयोगः अथापि नमस्कारान्तरात्प्रायात् ॥ शिष्यपरंपरयावानमस्कारान्तरालाविनामात् ॥ तद्दत्तस्तुपी
दृष्टांवदाद्वप्रयोगमदृष्टपरं ॥ अथवाद्वानुभासते ॥ अथवा स्वयं वाद्वान्नधिकारार्थः ॥ प्रयुक्तराथ इति ॥ गुरुव्याख्यानमात्रग्रहमाहात्म्यावबोध
ननमस्कारसाधनत्वेन तस्यात्ततु वक्तृत्वात् ॥ नमस्कारस्य हि माहात्म्यं स्वस्य ॥ अथवा गुरुव्याख्यानेनैव माहात्म्यं ज्ञाप्यते न नमस्कारपक्षा ॥ नम
स्कारान्तरमस्तु स्वपुण्यप्रसवार्थं ॥ सदाचारानुवृत्तिप्रदर्शनार्थं वा ॥ कृतातिमतदेवतापूजास्तुतिनमस्कारा हि सन्तः क्रियामारभन्त इत्यु
क्ति सदाचाराचारात् ॥ तत्र माहात्म्यज्ञापनं किमर्थमित्याचक्षते ॥ तच्छ्रोतॄणां वा प्रसादनार्थं ॥ ग्रन्थेन वा प्रसादनं श्रोतृणां स्ववचने सत्कृत्य श्रवणार्थं ॥ सत्कृ
त्य श्रवणार्थं ॥ सत्कृत्य श्रवणं च ग्रन्थस्य तद्विचारावतारप्रसादनार्थं ॥ तत्प्रसादने च तत्प्रहाणार्थं ॥ तत्सूत्रः सर्वदुःखदा ॥ पदमनलंकृतनि
र्वाणप्राप्त्यर्थमिति ॥ प्रयोजननिष्ठामाहात्म्यज्ञापने च कर्माचार्यस्य प्रयोजनमुक्तं साक्षात्प्रयोजनत्वात् ॥ तदितराणि त्वस्य हेतुत्वेनोक्ता
नीति ताकानि ॥ यच्छन्ति बुद्धं भगवन्तमधिकृत्याह ॥ सामान्येनाद्यापि यच्छब्दो विहितः विशेषणाभावात् विशेषप्रवृत्तिर्भवति ॥ तद्यथा य
उपोद्धातकथनेऽनेनः शुक्लवालाः सद्देवधर्मेति ॥ दर्शनादिहापि ॥ यः सर्वथा सर्वहतान्धकारः संसारपंकाज्जगदुज्जहार ॥ तस्मै नमस्कृ
त्येति बुद्धं भगवन्तमित्यध्याहर्तव्यं ॥ न हि बुद्धादन्यस्यैवं गुणविशिष्टः सम्भवतीति कथमाख्याचष्टे ॥ यच्छन्ति बुद्धं भगवन्तमधिकृत्याहेति
बुद्धशब्देनैकदेशिकविधानं बुद्धविकसनाद्बुद्धः ॥ विबुद्ध इत्यर्थः ॥ विबुद्धं पद्ममित्युच्यते यथा ॥ अविद्यानिद्रापगमाद्बुद्धः प्रबुद्ध इत्यर्थः ॥

नमस्करोति॥ कस्य॥ हारुपारु आत्मारु पिरु मारु इहिरु श्रुति॥ न यथा सर्वासां मारुष्टामियं संज्ञा मा नति॥ सर्वथाश्रुपिरुष्टां पितति॥ एवं सर्व
थां च शास्तृधामियं संज्ञा शास्तृति॥ स तु शास्त्राद्विविशेषो भवति॥ अयथार्थो यथार्थश्च॥ अयथार्थश्च पूरणादिः॥ यथार्थश्च तथागत इति॥ अ
तो विशिनष्टि यथार्थमविपरीतं शास्तीति यथार्थशास्ता॥ तत्र विरचयन् परहितप्रतिपत्त्युपायस्य वचनात्॥ अत आह॥ परहितप्रतिपत्त्यु
पायमस्याविष्कुर्वन्नीत्येवमादि॥ न बुद्धिवचनप्रदानप्रलापवन्नेति प्रलापवच्छब्दः प्रत्येकमभिसंबध्यते॥ अबुद्धिप्रलापवन्न वचनप्रदानप्रलापवन्ने
ति॥ अबुद्धिप्रलापवत् यथा विकृतिविश्वरूपसंदर्शनं॥ वचनप्रदानप्रलापवत् यथा महाश्चर्यावनेषु प्रशंसकीति प्रवादः॥ अथवा त्रिपदार्थः॥ अ
थवा वचनप्रदानेन च प्रलापवत् अथ॥ प्रलापः अक्लिष्टविरहितः॥ ननु च बुद्धा अपि कदाचित् अबुद्धिप्रातिहार्यं विनेयानां प्रदर्शयन्ति॥ अस्त्येतदेवम
पि त्वावर्जनमात्रं तु तत्र यो ननु शासनीप्रातिहार्यं तत्तु नागमादि प्रतिपत्त्या लाभनाकमथ संसारादुद्धरणं भवति॥ किं करिष्यतीति प्रश्नः॥ न
मस्कृत्येति॥ क्त्वाविधिः क्रियान्तरापेक्षत्वात्॥ समानकर्तृकयोर्हि पूर्वकाले क्त्वाविधिर्भवति॥ शास्त्रं प्रवक्ष्यामीति॥ अर्थविशेषाभिधा
नको नाम समूहः शास्त्रं अधिकृतात्॥ समूहो न पदपङ्क्तिरिति चेत्॥ न तत्र हेतुः बुद्धिरूपसमूहकल्पनात्॥ शिष्यशासनात् शास्त्रमिति॥ किं
नामधेयमित्याह प्रतिप्रायः अभिधर्मकोशमित्यस्य निर्वचनं वक्ष्यति॥ अभिधर्मकोशं नाम॥ अवयवार्थावबोधपूर्वकः समुदायार्थावबोध इत्य
वयवार्थं तावत् स्फुटति॥ कोऽयमभिधर्मो नामेति॥ १ ॥ ॥

प्रज्ञाऽमला सानुचराऽभिधर्मः तत्प्राप्तये यापि च यच्च शास्त्रम्॥ तस्यार्थतोऽस्मिन् समनुप्रवेशात् स चाश्रयोऽस्येत्यभिधर्मकोशः॥ २॥

प्रज्ञामला सानुचराभिधर्म इति॥ धर्मप्रविचयलक्षणा प्रज्ञा प्रधानमिति मुख्यवृत्त्या प्रज्ञाग्रहणं॥ अमलेत्यनास्रवा॥ मलानामास्रवपर्यायत्वात्॥
सानुचरेति सपरिवारा नानाज्ञासमं चरन्त्यपि रूपा नाजानुचरा इत्युच्यन्ते॥ तदनुवर्तिकानत्वात्॥ तत्थ हापि समकालं चरन्तोऽपि तत्सहभुवो ध
र्मा अनुचरा उच्यन्ते॥ कः पुनः स चित्तचैतसः॥ अनास्रवसंवरजात्यादयश्च चित्तविप्रयुक्ता इति॥ ननु च चित्तं चैतसेभ्यः प्रधानं॥ तथा हि चि
त्तस्य श्रम चित्तवान् यथा ध्येरुण इति॥ नन प्रहे व चित्तस्य परिवारा ईहिता तच्चित्तं प्रज्ञायाः चैतसिकत्वात्॥ अस्मात्तदपि तु धर्मप्रविचयलक्ष
प्रज्ञा चेतस्यापि सर्वस्य कलापस्य नायकत्वं॥ कश्चित्कश्चिद्धर्मः प्राधान्यमास्कन्दति॥ तद्यथाभिसंप्रत्ययकाले श्रद्धा स्वभावनायां प्रज्ञा पञ्चस्कन्धक
इति॥ अनास्रवसंवरस्तस्मिन् कलापे रूपस्कन्धः॥ या वेदना स वेदनास्कन्धः॥ या संज्ञा स संज्ञास्कन्धः॥ चेतनादिजात्यादयः संस्कारस्कन्धः॥
विज्ञानं चात्र विज्ञानस्कन्धः॥ एष तावदिति॥ तावच्छब्दः क्रमार्थः॥ पारमार्थिक इति॥ परमार्थ एव पारमार्थिकः॥ परमार्थे वा भवः
पारमार्थिकः॥ परमार्थेन वा दीव्यति चरति वा पारमार्थिकः॥ सांकेतिकस्तु सांव्यवहारिकः॥ तत्प्राप्तये यापि च येति प्रज्ञा सानुचरा साभि
धर्म इति चाभिधिकृतं॥ तस्या अनास्रवायाः प्रज्ञायाः प्राप्त्यर्थं सोक्रास्यान्ते पर्य्यध्रवा वा श्रुतमयी चिन्तामयी च भावनामयी च प्रज्ञा सास्रवा
॥ या चोपपत्तिप्रातिलम्भिका सानुचरा सापि सांकेतिकोऽभिधर्मः॥ तत्र श्रुतप्रयोगजा श्रुतमयी युक्तिनिध्यानप्रयोगजा चिन्तामयी॥ भाव
नाप्रयोगजा भावनामयी॥ उपपत्तिप्रतिलम्भा उपपत्तिप्रातिलम्भिका॥ उपपत्तिप्रतिलम्भोऽस्यास्तीति अत इति ठनो विहितत्वाद्विधानान्न
वृद्धिः॥ श्रुतचिन्तामय्युपपत्तिप्रातिलम्भिका भावनामयी चानुप्रयावचरी चतुःस्कन्धकोऽभिधर्मः॥ कुतः पञ्चविवर्जकरूपाभावात्॥ रूपाव

किं कारणं द्विविधा हि मार्गा लौकिका लोकोत्तराश्च ॥ अतो विशेषणार्थं पुनर्विधीयते ॥ अत एव चात्र मार्गसत्यग्रहणं ॥ प्रसिद्ध्यर्थं वार्थपदस्यागम्य
ते नाप्रसिद्धं ॥ अप्रसिद्धं चासंस्कृतमिति ॥ अपरे व्याचक्षते ॥ तृतीयस्याप्यर्थकालनिवृत्त्यर्थमर्थपरिसिद्धमप्यगत् ॥ पुनरुच्यते ॥ यथा हि ति
स्रो वेदना उक्ताः ॥ सुखा दुःखा अदुःखासुखा च सैव धर्मा अपि संगृह्यन्ते ॥ सास्रवा अनास्रवा सास्रवानास्रवाश्च तथा नैव सास्रवा ना
नास्रवाश्चेति ॥ तन्नयं स्थापयन्ति स्म ॥ किं पुनस्तथा उक्ता सास्रवा एव ॥ आहोस्विन्नास्त्यस्येति सन्दिह्यते ॥ अस्ति हि सास्रवानास्र
वत्वविकल्पावकाशः ॥ कथमिति ॥ वैभाषिकप्रक्रियया तावद्द्विधा सानुशयं क्लिष्टं सक्लिष्टमनुशायकं चेति वचनात् ॥ यच्चक्षुरादया
यावदनुपादयाऽक्लिष्टस्यानुशयाने नवास्रवे ॥ सास्रवानामननुशयाने ॥ प्रहीणे क्लेशेननुशयाने नास्रवेन सास्रवा ॥ अप्रहीणे क्लेशे प
ञ्चस्कानन्तरेऽपि सास्रवा भवति ॥ दार्ष्टान्तिकप्रक्रियया पि च चक्षुरादयोऽर्हत्सन्तानगता वा अनुपादयाऽनाश्रवा ॥ अनास्रवाश्रयमना
श्रयत्वात् ॥ सास्रवाश्च ते अनास्रवाश्रयमप्रतिपक्षत्वादिति ॥ पार्यायिकं नास्रवानास्रवत्वं चक्षुरादीनां कल्पयन्तीति सन्देहः ॥ तत्सन्देहविनिवृत्त्यर्थमि
दमुच्यते ॥ अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतमिति नियम्यते यमनास्रवा भवन्तीति न सास्रवा यस्थाकामिति पुनर्वचनं ॥ तत्र हि चक्षुरा
दयो वैभाषिके पक्षे निष्पक्षा ॥ किं सास्रवपक्षे अथानास्रवपक्षे इति ॥ सास्रवपक्ष एवेति तस्मात् ॥ कथं प्रहीणे प्रहीणे क्लेशे नास्रवे क्लेशे नास्रव
व्यवस्थाप्यते ॥ यथा सास्रवा अनुशयाना अननुशयिता वा अनुशयिष्यन्ते वा तस्मात् सास्रवाः कालिकार्थविवक्षया पि हि लोके वर्तमानकालप्रयोगादृ
श्यते ॥ यथा प्रज्ञानं कृतसत्त्वा अग्निः ॥ या पिनक्षिता वा न या पिनक्षिष्यति ॥ सचापि ता अग्निर्गम्यते भवति ॥ अत एव व्याख्यायते ॥ अथ वा यद्यपि तत् प्र ८

हारक्षेस्त्व अस्मचितिमितेनास्रवेन कः ४ पत्र सत्क्रानगतेन पि सास्रवा उच्यन्त इति ॥ ननु च समासनिर्देश अदवसास्रवानास्रवा धर्मा शुध्यति नीयता अथ प्रस
ङ्गः ४ ॥ न तत्रैकत्वेनास्य निर्देशः सम्भवात् ॥ सास्रवाश्च अनास्रवाश्च सास्रवानास्रवा शुद्धिति उक्ते ऽव धर्म ४ ॥ अस्त न्नू पाश्चमम्येकर शब शून्यता ॥ तत्र धर्म्मदृ
ष्टकाचिन्तिनियथ ॥ अपत्र पूननात्र नर्थ्य पञ्चासिद्धम वेनत्न स्पष्टीकरणार्थं तु प्रपञ्च उच्यते ॥ तथा अविरुद्ध धर्मविरुद्धयश्च वक्तव्यमितमे स३
व सर्वे सिद्धं ॥ पूर्वकालिकसर्वजन सूत्राधिकवला ४ ॥ समासानाधिकरणस्य च समासादि प्रपञ्च उच्यते ॥ तद्वक्तम् ॥ कतमं त्रिविधमसंस्कृत
मित्य प्रतीत्या स्वकृति ॥ त्रिविधग्रहणं शून्यकावधारणार्थं ॥ सन्ति हि केचिद् एकमेवासंस्कृतं निर्वाणमिच्छन्त्य यथा वात्सीपुत्रीयाः ४ पत्र माध्य
दयावहवात्सत्स्कृतां शून्यमिति वैभाषिकाः ४ ॥ तन्मत प्रतिषेधार्थमियत्तावधारणं ॥ कतमोत्र विति ॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधश्च व च कृ
ति ॥ नाकाशं आकाशस्य लोके प्रसिद्धत्वात् ॥ तत्राकाशमनावृतिरिति ॥ तत्र प्रतिनिर्देशार्थः ॥ वाक्यपर्यासो वा ॥ अवकाशं ददातीत्याकाशमि
ति निर्वचनं ॥ स्वरूपमस्याह ४ आकाशं तावत् अनावृत्याकाशमित्यपर ॥ अनावृतिरनावरणं ॥ कर्तृसाधनं कर्मसाधनं वा ॥ या धर्मो ऽन्यान्धर्मान्नावृणो
ति ॥ अन्यैर्वा नाव्रियते ॥ तदनावरणस्वभावं आकाशं ॥ तद्प्रत्यक्षविषयत्वात् अन्यधर्मानावरणादनुमीयते ॥ तत्त्वावरणभावमात्रं ॥ अ
तत्र चव्याख्यायते ॥ यत्र रूपस्य गतिरिति ॥ यदि यस्मादावरणभावेन नाव्रियते वा तदाकाशं अप्रतिघातपि चिकाद्य ४ सत्कार्यास्कारं थ व
तिरस्काराश्च प्राप्नुवन्ति ॥ न प्राप्नुवन्ति ॥ परेषामावरणभावात् ॥ कृत्रिमकारी हि चित्तचेतनवल्लन परेषां गतिं चित्तादीनां विबध्नन्ति ॥
प्रतिसंख्यान्यप्रतिसंख्यानिरोधो तर्हि अविबन्धकत्वादाकाशं प्राप्नुत ४ ॥ न तयो ४ संयोगद्व्यात्पुरस्कृत्य धर्मध्वंसं संयोग प्राप्ति नियतत्वा

क विद्यते हि स प्रतिसंख्यानिरोध इत्युक्तं प्राक् ॥ अनास्रवत्वाच्च प्रतिसंख्यानिरोधोऽपि नास्ति ॥ एवमसंस्कृतस्याल्पवक्तव्यत्वात् पुनस्ता ऽस्य
श्चान्यपि समापय्य संस्कृतान्निर्देष्टुकाम उपाद्घातमुत्सादयति ॥ यदुक्तं संस्कृता मार्गवर्जिताः सास्रवा इति ॥ कतमे ते संस्कृता इति ॥

ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकं ॥ त एवाध्वा कथावस्तु सनिःसाराः सवस्तुकाः ॥ ७ ॥

ते पुनः संस्कृता धर्माः ॥ पुनःशब्दः प्रत्यदानजप्रदर्शनार्थ उक्तः ॥ पूर्वं प्रत्यदसास्रवानास्रवा इति ॥ अस्यन्तु पुनः प्रत्यद इति ॥ असंस्कृ
तनिर्देशानन्तरव्यवहितत्वात् पुनः संस्कृतग्रहणं असंस्कृतनिरासार्थं ॥ त इति तच्छब्दः पूर्वप्रकृतापेक्षः ॥ के च पूर्वं प्रकृताः ॥ अवर्जि
ता ये च सास्रवाः ॥ वर्जिता ये च मार्गसत्यस्वभावाः ॥ उभयपक्षिताः कथं गम्यते ॥ ये सास्रवा उपादानस्कन्धास्त इति अनास्रवस्यः
सास्रवनिष्कर्षं वचनात् ॥ यद्रूपादिस्कन्धपञ्चकं वक्ष्यमाणलक्षणं तमी संस्कृता इत्याः ॥ अन्यान्यमर्वां संग्रहः ॥ रूपादिग्रहणं शीला
दिस्कन्धनिरासार्थं ॥ अन्येऽपि हि पञ्च स्कन्धाः सन्ति ॥ शीलस्कन्धः समाधिस्कन्धः प्रज्ञास्कन्धो विमुक्तिस्कन्धः विमुक्तिज्ञानदर्शनस्कन्ध
श्चेति ॥ स्कन्धग्रहणं रूपादिविषयनिरासार्थं ॥ समस्य संस्कृत इति पर्यायावेतौ ॥ अथवा समस्य समागम्यान्योन्यमपेक्ष्येत्यर्थः ॥ संभूय
संकृत्य स्येवं संशब्दस्यार्थं दर्शयति ॥ नैकप्रत्ययजनितमिति ॥ सर्वाल्पप्रत्ययत्वमपि अवश्यं द्वौ प्रत्ययौ स्तः ॥ चतुर्भिश्चित्तचैत्ता हि स
मापत्तिद्वयं त्रिभिः द्वाभ्यामन्ये तु जायत इति वचनात् ॥ इदं चैतन्धनवदिति ॥ संस्कृतशब्दस्य निष्ठान्तत्वात् निष्ठान्तशब्दमेव दृष्टकं दर्श १३

यति॥ डित्थवदिति डित्थं नाम कश्चित्॥ यत्स्वनानिष्कासितं तं डित्थमिति न्यायं॥ यत्तु निष्कासिष्यते॥ यच्च नैव निष्कासिष्यते रथनृत्यमववर्त्तते
ते डित्थमिति न प्राप्ते॥ उच्यते लोके डित्थमित्येवमिहापि यत्संस्कारिष्यते उत्पत्तिधर्म्मा। एवमनागतार्थेपि न संस्कारिष्यते। तत्तु उत्पत्तिधर्म्मा
ध्वस्तमपि संस्कृतानुवृत्त्यते॥ गच्छतीयत्वात् स्वलक्षणसाहचर्य्यम्॥ तत्र वा रक्ष्यति विस्तरः॥ सर्व्वोत्पत्तिधर्म्मः स्वार्थः स्वप्रनिकथः स्वप्रव्याख्या
नमिति॥ स्वप्राक्कालानामपि त्र्यध्वदीनां स्कन्धपर्य्यायत्वात्तेषां ध्वं हवचने॥ गतगच्छत्गमिष्यद्वादिति॥ लोकप्रसिद्धमध्वानमपश्चायमध्वया
ख्यातः॥ तथा हि लोके कथ्यते॥ अयमध्वा अमेन गतो यमध्वा गच्छन्त्ययमध्वा गमिष्यतीति। एवमिहापि गतोध्वा यातीतः॥ गच्छतियावर्तु
मानः गमिष्यतियानागतश्चेति॥ अयं च निरुक्तयातिवाध्वनशब्दस्याधिकृतं नेनुक्तं विधानमपश्चायमर्थोदर्शितः॥ अयं च निरुक्तयात
त्र कष्ठगि॥ अध्वनष्ठगि संस्कृता उवाध्वत्वेन गवन्नादर्शिताः॥ कथावस्तुत्वेनापि तत्र संस्कृता गवन्नादर्शिताः॥ त्रीणीमानि
लक्षणः कथावस्तूनि अत्र चतुर्थान्यपि च मानि यान्याधिकृत्याप्याः कथाः कथयन्तः कथयन्ति॥ कतमानि त्रीणि अतीतं कस्त्वनागतं कथावस्तु
प्रत्युत्पन्नमिति कथावाक्यमिति विस्तरः॥ कथावाक्यं वचनात्मकत्वाच्छब्दस्वभावः॥ तस्या वस्तु नामविषयत्वादर्थः॥ नाम्नः पुनरर्थोपि त्व
यः॥ तथा हि वक्ष्यति वाग्नाम्नि प्रवर्त्तते नामार्थं द्योतयतीति॥ यदि नामैव कथावस्तु नाम च संस्कारस्कन्धैकदेश एवेति कथं कृत्वा कथावस्तु
त्वेन संस्कृता उक्ता अस्त्युक्तस्याह॥ सार्थकवस्तुग्रहणात् संस्कृतं कथावस्तूच्यते॥ अन्यथा हीति विस्तरः॥ यदि सार्थकं वस्तुन
गृह्यते प्रकरणाच्छब्दः स्यादित्युच्यते॥ कथावस्तुत्वेनाप्यनेकाधिधात्वे सं गृहीतानीति॥ कथा पुनर्युक्ता सार्थकं वस्तु गृह्यतेति विधः क

पंकलगन्नोति ॥ पंकादिलोकस्यावसादात्मकत्वात्संसारः पंकस्तस्मान्तं ॥ अत एव चदनुद्धृत
न४ ॥ संसारोपि हि दुःखस्यतिस्यन्दितत्वात्संसारस्तस्मान्तं ॥ इतुद्धृत्य दृष्टिविचिकित्साविष्यन्दितान ॥ बुद्धापायात्कलक्षीयत्वनवाउद्धृ
तवान्४ ॥ तथावमग्नस्तात्स्यानुप्रवेशात्४ मृत्याद्यवयवनिमग्नावाजगत्सत्त्वलोकमधोधनार्थं अनुकम्पमानः कन्दुक्षायमाना
दृतवान् सद्धर्मदेशनाहस्तप्रदानैः ॥ सद्धर्मदेशना एव हस्तः ॥ तस्याः प्रदानानि उद्धृत्यनक्षीयवकुस्वादुद्धवचनैर्गर्यथार्हव्यवस्थ
तवान् ॥ यथार्हमिति अनुरूपमानमपि गम्यते लोके न यथादृष्टत्वात् ॥ तद्यथा ब्राह्मणा आमानीयन्तां राज्यामासस्थितः ॥ यथाप्रत्यर्हं राजयितुं
कं ॥ अमनागन्ववासन्निहिताः ॥ तानेव राज्यामासमिति गम्यते ॥ सर्वलोकब्राह्मणानां राज्यितुमशक्यत्वात् ॥ एवमिहापि याउज्ञा
हव्यास्तु हुर्दृः ॥ तम्य वासुद्धृतवानिति ॥ तत्र यथार्हमिति व्याचष्टे ॥ तस्मै नमस्कृत्येति भिन्नसाधनप्रक्रियासंबन्धितत्वान्नमः
शब्दस्य प्रक्षिप्यतार्थं नमस्कृत्य शब्दाद्वितिप्रक्षिप्तार्थस्य लोकभिन्नसाधनीत्युक्तं ॥ मिन्नसंस्कारः ॥ वाक्मनानमस्कारापि अत्रानु ४
क्तः सिद्धांतगुणाख्यानपूर्वकत्वात् मनस्कर्मपूर्वकत्वाच्च कायकर्मादः ॥ तस्मै इति किं लक्षणाये चतुर्थी ॥ अत्र वहवाव्याख्यानकारा मु
ह्यन्ति ॥ आचार्यगुणमतिस्तु व्याख्याचार्यवसुमित्रश्चाहतुः ॥ नमः शब्दयोगे चतुर्थी ॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चे
ति ॥ तदेतदयुक्तं ॥ स्वस्तिकृस्य नमः शब्दस्य योगे सा चतुर्थी भवति ॥ अस्वतन्त्रश्चायं नमःशब्दः ॥ क्रियासंबन्धितत्वात् ॥ अत एव चान
सेवाचार्यधव्याख्यायुक्तौ नमस्कृत्यमुनीन्द्रंतिकर्मलक्षणा द्वितीया प्रयुक्ता ॥ तस्मान्न नमःशब्दयोगे चतुर्थीति ॥ द्वितीयायाः स्थान

चतुर्थी प्रयुज्यते ॥ तदिदमभिधानमात्रं न हि लक्षणमस्तीति ॥ कथं तर्हि यत्र चतुर्थी संप्रदानलक्षणं यत्र चतुर्थीति व्याचक्ष्महे ॥ क
थं संप्रदानसंज्ञा ॥ कर्मणायमभिप्रैति स सम्प्रदानमिति ॥ द्विविधं कारकं कर्म … यथा … ॥ … लौकिकं कर्म लौकिकं चेति ॥ तत्र यदा
कर्तुरीप्सिततमं कर्मेति … कर्माभिधीयते ॥ तदा कर्तुरीप्सिततमेन यमभिप्रैति स संप्रदानसंज्ञो भवति ॥ ब्राह्मणाय गां प्रयच्छ
तीति ॥ एतत्सिद्धं भवति ॥ यदा तु कर्म क्रियेति लौकिकं कर्माभिधीयते ॥ तदा क्रियया यमभिप्रैति स सम्प्रदानसंज्ञो भवतीति ॥ तदेतत्सि
द्धं भवति ॥ युद्धाय संनह्यति ॥ पत्ये शेते ॥ … क्रियया युद्धमभिप्रैति कर्तृणा यत् क्रियया … ॥ युद्धादीनां संप्रदानसं
ज्ञा सिद्धा भवति ॥ तथा … नमस्कारक्रियया … अभिप्रैति आचार्यः ॥ तस्मात् … संप्रदानसंज्ञा संप्रदानसंज्ञायां सत्यां संप्र
दाने चतुर्थीति चतुर्थी भवति ॥ एवं च कृत्वा पूर्वं … ॥ … ॥ …
… ॥ एवमादीनि … ॥ यदि तर्हि संप्रदानसंज्ञा … ॥ नमस्कृत्य मुनिं …
… ॥ विवक्षातः कारकाणि भवन्ति ॥ यदा कर्म विवक्ष्यते तदा … द्वितीया ॥ यदा संप्रदानविवक्षा तदा
चतुर्थीति उभयमपि सिद्धं भवति ॥ … संज्ञायां चानिष्टा वि
ति ॥ … भवति ॥ ननु च संज्ञायां … भवति न च यं संज्ञा ॥ संज्ञेयं द्विविधा हि संज्ञा ॥ विशेषसंज्ञा ॥ सा
मान्यसंज्ञा वा विशेषसंज्ञा … ॥ सामान्यसंज्ञा … संज्ञायाम … ॥ नच

...तिधर्मकोश

र्मा इत्ययमिति समासनिर्देश इति संक्षेपनिर्देश इति संक्षेपनिर्देशः॥ विस्तरनिर्देशस्तु पश्चाच्छास्त्रपरिसमाप्तेर्भविष्यति॥ अन्ये तु विसमा
सनिर्देशः सन्ति॥ संस्कृता असंस्कृता रूप्यरूपिण इत्यादयः सनिर्देशनानिदर्शनानि दर्शनानीत्येवमादयः। किमर्थमयमेव समासनिर्देश उ
क्तः। कस्मिन्नर्थे न पर्यनुयोगः॥ अथवा सांक्लेशिकव्यावदानिकपक्षप्रदर्शनार्थं तदर्थत्वाच्छास्त्रस्य॥ तस्य ज्ञेयाद्यावबोधो हि संक्लेशप
क्षस्य प्रहाणाय व्यवदानपक्षस्य च नान्निरोधस्य प्राप्तिरेव तु॥ संस्कृता मार्गवर्जिताः सास्रवा इत्युच्यन्ते संस्कृता एव नासंस्कृताः॥ हेतुप्रत्ययजनिता
न्नुपादाय संस्कृताः॥ किं सर्वे॥ नेत्याह॥ मार्गवर्जिताः मार्गसत्यं न वर्जिताः॥ मार्गसत्यं न वर्जिताः॥ मार्गसत्यस्य संस्कृतत्वात्प्रसङ्ग इत्युप
त एवं विशिनष्टि॥ तत इदमुक्तं भवति मार्गसत्यवर्जिताः सर्वे संस्कृताः सास्रवा इत्युच्यन्ते॥ कथं पुनस्ते सास्रवाः॥ यद्यास्रवसंप्रयोगात् क्लिष्ट
त्वविरुद्धं चेत्। सास्रवाः स्युर्नान्ये॥ अथ आस्रवसहायसाधकत्वात् सत्कायसमुदाचरणत् क्लेशस्य तत्र यथा स्कन्धपञ्चकं उपादानस्कन्धा ८
इति सास्रवाः स्युः॥ नासत्स्वास्रवेषु तत्क्लेशस्य॥ नापि वाह्या धर्माः॥ कथं सास्रवा यस्मात् आश्रयास्ते सास्रवा इत्युच्यन्ते॥ षडायतनान्यध्यात्मि
कानि सास्रवाणि स्युः॥ अथ आस्रवाणामालम्बनानि सास्रवाणि॥ निरोधमार्गसत्यमपि सास्रवं प्राप्नोति॥ ऊर्ध्वाश्च तस्मिन्नूर्ध्वे तस्यालम्ब
नेनास्रवे॥ सास्रवा आस्रवास्तेषु यस्मात्समनुशेरते तत्र तस्मात्सास्रवा इत्युच्यन्ते पूर्वेणासम्बन्धाः॥ अनुशेरत इति
पुष्टिं लभन्त इत्यर्थः॥ प्रतिष्ठां लभन्त इत्यपरे अर्थे वा॥ पुष्टिलाभप्रतिष्ठालाभ एवागमादयः सत्कायदृष्टेः॥ अपरे व्याचक्षते॥ यथा
नुशेरत समाप्तस्य हार्दत इति पर्यवस्थानुगुणीभवन्तीत्यर्थः॥ तथा चागमः पितृस्वधर्म्ये स्वनुशेरत॥ अनुगुणीभवन्तीत्यर्थः॥ ना

गम्यते । ईप्सितनिरोधकर्म्मशिवर्जिता हि सास्रवा धर्माः कर्म्मक्लेशलोकविचित्रमिति वचनात् ॥ प्रकृत्यानुशेरते ऽनुशेरते तेषु पुष्टिं लभन्त इत्य
नुशयाः ॥ अनुशेरतेऽनुगता भवन्ति प्रतिष्ठां लभन्त इत्यनुशयाः ॥ अनुशयपतेष्वालम्बनतः संप्रयोगतो वाऽनुशेरते वा ॥ उक्तमपि सिद्ध
वाच्यं तद्व्याख्यानं ॥ किं कारणं यत् सर्वे धर्म्माः स्वास्रवा धर्मालम्बनीयवस्तु संस्कृता एव मार्गवर्जिताः सास्रवा उक्ता इत्याह ॥ सर्वे धर्म्माः सास्र
वाधर्मालम्बनमिष्यन्ते धर्म्मिकीयमतत् ॥ आकाशप्रतिसंख्यानिरोधयोरनास्रवालम्बनत्वात् ॥ एतद्वशात् अनुशयाः अनास्रवालम्बनाः प
श्यन्ते ॥ ननु निरोधमार्गालम्बना एव मिथ्यादृष्टिविमतीनां प्रत्यय अविद्याश्च केवला ॥ निरोधमार्गदर्शनहेयाः एतेनास्रवत्वेन चानुशेरते इति
वचनात् ॥ तस्मान्न सम्यग्लिखितमदिति यत्र्यम कामम्मितीयमपीत्यर्थः ॥ अथवा कामम्मिति निपातोऽभ्युपगमार्थः ॥ अभ्युपगम्यते एव नि
रोधमार्गसत्यालम्बना अपि सास्रवा उपजायन्त इत्यर्थः ॥ तत्र निरोधमार्गसत्यानुशयनिर्देशे एव स्थापयिष्याम इति ॥ नानास्र
वार्थविषयास्वीकाराद्विपक्षत्वात् प्रत्ययद्विवक्षत्वात् सहदृष्टिः ... स्वीकृत्य सर्वतः तत्रान्यस्यानुशयाः अनुशयितुं मृतस्कं ॥ आर्द्र
श्रवपत्र ... संस्कारं ॥ न चैवमनास्रवं ॥ नाप्यर्ध्वं ... मिव नानन्तालम्बनास्यानुशेरते विपक्षत्वात् निर्वाणमार्गो न तदालम्ब
नानोक्तवानां ॥ ... निरोधमार्गौ ... प्रतिष्ठां लभन्ते ॥ तत्फलं वा पलितपलानि पादानामिति ॥ ४ ॥

अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतं ॥ आकाशं द्वौ निरोधौ च तत्राऽऽकाशमनावृतिः ॥ ५ ॥

अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतमित्यर्थपरिशिष्टत्वात् ... नस्य प्रतिज्ञामनदिति एवं बोध्य ॥ आचार्यगुणमतिस्त्वाह ॥ वक्तव्यमवदं

दिविज्ञानानां॥ युगपद्विज्ञानासम्भवात्॥ उत्पादनधर्माणश्चैतत्॥ ऽवेकाक्षिज्ञानादीनां पंचानामपि आपायिकानामनागतानां
स्कन्धानां तदुत्पत्तिविघ्नप्रत्ययसंमुखीभावे न प्रत्ययवैकल्यात् अप्रतिसंख्यानिरोध ४ प्राप्त इत्युदाहार्यं॥ अप्रतिसंख्यानिरो
ध एव वा हि संधायस्यात् आपन्नं पूर्णमधिकृत्याकं रूगबलानि नूद्धास्यनकाक्षियेश्वर ४ प्रनाष्ठुति॥ तद्वैजातीयकानामनाग
तानां धर्माणां प्रत्ययवैकल्यात् प्रतिसंख्यामकृत्वैव उत्पादस्यानियतानाधर्मतायाधर्म ४ साप्रतिसंख्यानिरोध इत्युच्यते॥ नहि प्रत्य
यवैकल्यमात्रादस्यैकं तदनुत्पत्तिरुपपद्यते॥ पुनस्तज्जातीयप्रत्ययसान्निध्यत उत्पत्तिप्रसंगात्॥ काहितदा तदुत्पत्तौ विबन्ध ४ स्या
दिति वैलक्षिका ४॥ चतुष्कोटिकं चात्र विसर्जनं ४॥ अप्रप्रतिसंख्याऽप्रतिसंख्यानिरोधलक्षणनिर्देशेन चतुष्कोटिकं चतुष्कं प्रश्न
विसर्जनं॥ किमर्थमनुत्पादनार्थं॥ तद्यथातीतप्रत्युत्पन्नोत्पत्तिधर्माणां सास्रवाणामिति सास्रवत्वात् प्रतिसंख्यानिरोध एवं लक्षण॥ १२
अतीतप्रत्युत्पन्नानामुत्पादस्य कृतत्वात्॥ उत्पत्तिधर्माणां चावर्णंतावात्॥ नाप्रतिसंख्यानिरोधलक्षण॥ उत्पादात्यन्तविघ्नल
क्षणस्याप्रतिसंख्यानिरोध ४॥ तद्यथा॥ ऽनुत्पत्तिधर्माणामनास्रवसंस्कृतानामिति॥ अत्यन्तविघ्नितोत्पादत्वादेषामनुत्पत्तिधर्म
त्वं॥ अतद्यथा साप्रतिसंख्यानिरोधलक्षण॥ तद्यथा च भूमिकानामनागम्यध्यानाद्ध्यानभूमिकानां अथवा नु साक्षिमार्गाणामस
कस्मिंस्संमुखीभूतशेषाणां पंचानामप्रतिसंख्यानिरोधलक्षण॥ ननु प्रतिसंख्यानिरोधोऽनास्रवत्वात्॥ नहि निर्दोषं प्रहानार्हं त
वति॥ अनुत्पत्तिधर्मग्रहणं अतीतप्रत्युत्पन्नोत्पत्तिधर्मनिरासार्थं॥ अनास्रवग्रहणं सास्रवनिरासार्थं॥ संस्कृतग्रहणमसंस्कृत

निर्वाणार्थी॥ असंस्कृतमपि हि स्वलक्षणात् अनुत्पत्तिधर्मकं· अनागतस्य संगमात्रं दिशितं द्विरष्टषष्ठं॥ केषांचिदेवं पाठः यथा अनुत्पत्ति-
धर्माध्वमनागतात्सुवाध्वमिति॥ तेषां कथमसंस्कृतानां ग्रहणप्रसंगो न भवति॥ येषां धर्माणामप्रतिसंख्यानिरोधः अप्रतिसंख्यानिरोधश्च सं-
भवति॥ तेषामधिकारात् न चासंस्कृतानां योऽनिरोधः संभवतः॥ उत्पादप्रत्ययविघ्नात् अप्रतिसंख्यानिरोधः न चासंस्कृतानामुत्पादोऽस्ति॥ किं-
चानुत्पत्तिधर्माध्वमिति पर्युदासेन नञ्समासः॥ उत्पत्तिधर्मस्यायमन्यतत्सदृश अधर्मोऽस्त्यनुत्पत्तिधर्मोऽयः॥ कश्च तत्सदृशः॥ संस्कृत ए-
व नासंस्कृताध्वनि॥ अप्रसंगश्च असंस्कृतानामित्युक्तं भवति॥ स किं एषामनुत्पत्त्यमिति प्रतिसंख्यानिरोधश्च अप्रतिसंख्यानिरोधश्च॥ तद्यथा सास्र-
वाध्वमिति विस्तरः॥ सास्रवत्वादेषां प्रतिसंख्यानिरोधः प्राप्यते॥ अनुत्पत्तिधर्मस्याप्रतिसंख्यानिरोधोऽपि प्राप्यते॥ एतत्तदनयोः प्रा-
प्तिचरितं प्रीयते॥ नावश्यमनयोर्युगपत्प्राप्तिर्भवति॥ केषांचिद्धि पूर्वं प्रतिसंख्यानिरोधः प्राप्यते॥ पश्चादप्रतिसंख्यानिरोधः॥ तद्य-
थार्हत्यकरूपव्यासक्तचक्षुर्मनसस्तदन्यरूपायालम्बनानां पंचानां विज्ञानकायानां॥ केषांचित्पूर्वमप्रतिसंख्यानिरोधः प्राप्यते
पश्चात्प्रतिसंख्यानिरोधः॥ तद्यथा ज्ञानक्षान्त्यादिनाऽपायगतीनां॥ केषांचिद्युगपत्॥ तद्यथा दृष्टिप्राप्तस्याधिमात्राधिमात्रक्लेशप्रतिपक्षो-
दये॥ तेषामधिमात्राध्वमनागतानां क्लेशानां प्रतिसंख्यानिरोधश्चाप्रतिसंख्यानिरोधश्च युगपत्प्राप्यते॥ एवमन्येषामपि संभवतो यो-
ज्यं॥ तद्यथातीतप्रत्युत्पन्नानुत्पत्तिधर्माणामनागताध्वमिति॥ अप्रतीतादीनामपि उत्पादस्य विघ्नस्थितस्य मनस्कारात् अप्रतिसंख्यानिरोध
न लभ्यते॥ अनागतानामुत्पत्तेरसंभवात् येषां प्रतिसंख्यानिरोधोऽपि न लभ्यते॥ असंस्कृतानां तु स्वालक्षण्यात् नाप्रतिसंख्यानिरोधोऽस्ति॥ उत्पादप्र-

हीणं॥ किमिदमुच्यते॥ क्लिष्टसंमोहस्य तथा मस्कन्धविगमश्चेति॥ तथा ह्युक्तं नाहं कस्यचिद्धर्मस्याप्रतिज्ञायमेऽनभिज्ञाय दुःखस्यान्तक्रियां व
दामीति॥ तथा नाहं कस्यचिद्धर्मस्याप्रतिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति॥ तस्माच्छ्रावकप्रत्येकबुद्धानामपि तदक्लिष्टसंमोहनं च तन्ना
दिवच्छन्दसा तत्प्रहीणमतः प्रहीणमेव॥ अन्यथा हि श्रावकप्रत्येकबुद्धानां दुःखान्तक्रिया न स्यात्॥ स्यादेतत् प्रहीणमेव तथाप्यक्लि
ष्टवदक्लिष्टसंमोहनं॥ तत्कुतोऽवांच्छन्नादिवत् प्रहीणमपि समुदाचरति॥ बुद्धस्य तु प्रहीणं सन्न समुदाचरति॥ अत एव च विरतो वि
गतप्रत्ययत्वात्सर्वधर्मत्वात्॥ हतमिति॥ अन्यथा तत्सर्वथा सर्वप्रकारं प्रहीणमिति वाच्यं स्यात्॥ यत्तु वाच्यं तच्छ्रावकप्रत्येकबुद्धानां क्लिष्टसं
मोहमात्रविगमात् संक्लिष्टविनिवृत्तिरिति॥ तदप्याख्यातमसंयोगस्थानमिति॥ प्रश्नाच्चम्मत॥ तथा सम्यगिति विस्तरः॥ तथा हीति
यस्मादित्यर्थः॥ अन्यथा तथेति॥ यथा न सर्वथा तथेति हि शब्दो हेतौ॥ तेषामिति॥ श्रावकप्रत्येकबुद्धानां॥ बुद्धधर्मेष्वावेणिकादिषु॥
अतिविप्रकृष्टदेशकालेषु चार्थेषु अतिविप्रकृष्टदेशेषु अतिविप्रकृष्टकालेषु च॥ अनन्तप्रभेदेषु॥ बुद्धधर्मेष्वनावेणिकेष्वपि सू
मादिष्वर्थेषु॥ तदवस्थाक्लिष्टसंमोहनं समुदाचरत्येवेत्यर्थः॥ तत्र बुद्धधर्माणामावेणिकादयः सूक्ष्मास्वभावपरमसूक्ष्मत
तीतत्वाद् बुद्धादन्येषामसंज्ञानं॥ यथोक्तं॥ जानीषे त्वं शारिपुत्र तथागतस्य शीलस्कन्धं समाधिस्कन्धं प्रज्ञास्कन्धं विमुक्तिस्कन्धं विमु
क्तिज्ञानदर्शनस्कन्धमिति॥ भगवतापृष्टेन स्थविरेणाजानतीय प्रत्युक्तं॥ नो हीदं भगवन्निति॥ यत्र च तथागतस्य पिण्डपातमा
त्रे सत्क्रियातोऽल्पद्धिविप्रकृष्टदेशादिरेव किं॥ यथा विप्रकृष्टेषु चापि अतिविप्रकृष्टदेशाध्वानतोऽतिविप्रकृष्टदेशा 3

रवक्रित॥ स्वपितत्वाम्ऽज्ञानमनंतकलाकथात्वकंपितदंतत्वात्॥ अथ यतो हि स्फुविरमोजल्पायनस्य स्मृतिविरुद्धदोषमापी त्रिलोक
धातुआगस्यमाद्ददंत॥ परिज्ञानं॥ स्मृतिविरुद्धकालस्वप्यतीतस्य अनागतस्य वा तस्य अर्थस्य तिवस्तुकल्याकवाकजितविनाशप्राइ
त्रिवत्वात् तस्यां रवश्यवाज्ञानं॥ अथ यतो हि स्फुविरआनिवृत्तधमाकुलागीयकृत्यलमूलादर्शनात्स्ववध्यपक्ष प्रत्युषप्रत्याख्यानं॥ र
गवतात्तु तस्य मात्रुलागीयं हष्टस्य र्कं चमात्रवीजमहत्वकस्य स्वस्य स्वप्नकृयधातुपाषाणविवरनिलीनमिवकोष्टनमिति॥ स
चपञ्चषष्ठज्ञाजितं दृश्यमिति॥ अनंतप्रदर्शिति॥ धातुगतियात्र्यमपरमादिप्रदर्शवोध्येयस्वार्थस्य॥ तस्याम ज्ञानेन व्यवस्थ वा॥ तथा चाह॥ सर्वाकारं
कारतमकस्य मयस्य वह्निकस्यापिना सर्वज्ञेयं सर्वज्ञज्ञानवलेहितज्ञानमिति॥ तान्यतानि चत्वार्यपि ज्ञानकारणानि रतकि॥ तत्वांकचिस
कंक्वचिद्धक्वचिस्त्रीधिकचिच्चत्वारीति॥ सेरवतायायत्र निःश्रेयसात्महितप्रतिपत्तिसम्पदिति विस्तरः॥ आत्महिताय प्रतिपत्तिः॥ आ
त्महितप्रतिपत्तिः॥ आत्महितप्रपत्तिः सम्पत् सकलनिष्पत्तिर्विनिस्पर्थः॥ साश्वयं सम्पत्॥ ज्ञानप्रहारस्य संपत्स्वलवावदितव्या॥ पर
हितप्रतिपत्तिसम्पदपि तथैव वर्चनीया॥ अयं तं व्याचक्षते॥ आत्महितप्रतिपत्तिरात्महितप्रतिपदने॥ आत्महितापग्रहणमित्यर्थः
॥ तस्याः सम्पत् आत्महितप्रतिपत्तिसम्पत्॥ एवं परहितप्रतिपत्तिसम्पदपि व्याख्येया॥ सा पुनः सर्वदुःखापगममनिर्वाणपदिप्राप
धस्वालाया॥ संसारपंकात् गृहत्वात् इति वचनात्॥ संसरणं संसारः आजवंजवीभावः॥ जन्ममरणपरम्परेत्यर्थः॥ अथवा संसरंत्य
स्मिन् सत्त्वा इति संसारः॥ धातुकं संसारः पंकः इव संसारपंकः॥ पंकसाधर्म्यादित्याह॥ संसारो हि जगदासंगस्थानत्वाद् दुरुत्तरत्वाच्च

अभिधर्मकोश

धर्म्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः। क्लेशैश्च भ्रमति भवार्ण्णवेऽस्मिंल्लोकस्तद्धेतोरत उदितः किलैष शास्त्रा॥ ३ ॥

धर्म्माणां प्रविचयमन्तरेणेति विस्तरः। यस्माद्विना धर्म्मप्रविचयेन तद्रूपं वदतां निःस्पृहः स्वमिस्त्रवमाकारेण नास्ति क्लेशानामुपशमायाभ्युपायः। नान्यथेति वाक्यशेषः। स एव उक्तः क्लेशोपशमाभ्युपाय इति। अर्थादापन्नं भवति। तद्यथा नाहारमन्तरेण विना प्राणसंधारणोपाय इत्युक्ते स एवाहारः प्राणसंधारणोपाय इत्यर्थादापन्नं भवति। तद्वदेतत्। यदि क्लेशोपशमाभ्युपायो न स्यात् किं स्यादिति। अत आह। क्लेशैश्च भ्रमति भवार्ण्णवे लोक इति। अनेन क्लेशोपशमस्यावश्यकर्त्तव्यतां दर्शयति। भवः संसार इत्यर्थः। भव एवार्ण्णवो भवार्ण्णवः। गम्भीरत्वसाधर्म्यात् समुद्रकल्पो भवः। तस्मिन् भवार्ण्णवे। अत्र भ्रमणग्रहणेन पंचापादानस्कन्धलक्षणव्याप्तिक एव प्रतिषेधार्थमात्रग्रहणं। अत्र लोको भ्रमति। गतस्यावस्थानात्। गतस्यावस्थानगोपि हि सूधिकरणनिर्देशोऽयं द्रष्टव्यः। तद्यथा। अन्यपादपानुपपादानगतात्पलायिताः पक्षिण इति। वक्ष्यति हेत्वर्थं गोल्लीयायाः प्रचयताहेतुमकिं चात्र स्वयमुक्तः। क्लेशाश्च लोकं भ्रमयन्तीति। अतस्तद्धेतोरिति हेतुप्रत्ययाय। यत एवमत उदितोऽभिधर्म्म इत्यर्थः। धर्म्माः प्रविचयः क्लेशोपशमायायाताभिधर्म्म इत्यभिधर्म्मोपदेशकः सम्बन्धः। इत्युक्तं तद्धेतोरिति। स एव हेतुस्तद्धेतुः। तस्य तस्यात् तद्धेतोरिति तस्य धर्म्मप्रविचयस्यार्थेऽभिधर्म्मोपदेशहेतुकाः धर्म्मप्रविचयः। कथं नाम धर्म्मप्रविचयः स्यादित्यभिधर्म्म उपदिष्टः। अतस्तद्धेतोरत एव न हि विनाभिधर्म्मोपदेशेन शिष्यः शक्तो धर्म्मान् प्रविचेतुमिति। उदित इत्युक्त इति वदन्ति शास्त्रीयं कृतसंसारव्यसनेतरूपं। न तु ... उत्सूर्व स्वार्थस्य ... अत इदित इत्युक्तः। उपदिष्ट इत्यर्थः। किलेति किलशब्दः परमताभिप्रायं द्योतयति। आभिधार्म्मिकाणामेतन्मतं। न त्वस्माकं सौत्रान्तिकानामिति भावः।

श्च यदभिधर्मशास्त्राणां कर्त्तन॥ तद्यथा ज्ञानप्रस्थानस्य आर्यकात्यायनीपुत्रः कर्त्ता॥ प्रकरणपादस्य स्थविरवसुमित्रः॥ विज्ञानकायस्य
स्थविरदेवशर्मा॥ धर्मस्कन्धस्य आर्यशारिपुत्रः॥ प्रज्ञप्तिशास्त्रस्य आर्यमौद्गल्यायनः॥ धातुकायस्य पूर्णः॥ संगीतिपर्यायस्य महाकौष्ठिल
ः॥ कः सौत्रान्तिकार्थः॥ ये सूत्रप्रामाणिका न तु शास्त्रप्रामाणिकाः॥ ते सौत्रान्तिकाः॥ यदि न शास्त्रप्रामाणिकाः कथं तेषां पिटकत्रयव्यवस्था॥ सूत्र
पिटको विनयपिटकोऽभिधर्मपिटक इति॥ सूत्रेऽपि ह्यभिधर्मपिटकः श्रुतः॥ त्रैपिटको भिक्षुरिति॥ नैष दोषः॥ सूत्रविशेषा एव ह्यर्थ
विनिश्चयादयोऽभिधर्मसंज्ञाः॥ येषु धर्मलक्षणं वर्ण्यते॥ उत्तरार्धं कारिकार्थमाह॥ स तु प्रकीर्ण उक्तो भगवतेति विस्तरः॥ यथा स्थ
विरधर्मत्रातेन उदानानि निकायान्तरसंस्कृतानि अनित्यवर्गादिका विनेयवशान्तरप्रकीर्णान्युक्तानि वर्गीकृतानि॥ एवमभिधर्मोऽपि धर्म
लक्षणोपदेशस्वरूपो विनेयवशाद्भगवता प्रकीर्ण उक्तः॥ स्थविरकात्यायनीपुत्रप्रभृतिभिर्ज्ञानप्रस्थानादिषु पिण्डीकृत्य स्थापित इ
ति काश्मीरवैभाषिकाः॥ विभाषया दीव्यन्ति चरन्ति वा वैभाषिकाः॥ विभाषां वा विदन्ति वैभाषिकाः॥ उक्तादि प्रश्नपादहक॥ ३ ॥

सास्रवाऽनास्रवा धर्माः संस्कृता मार्गवर्जिताः॥ सास्रवा आस्रवास्तेषु यस्मात्समनुशेरते॥ ४ ॥

सास्रवानास्रवा धर्मा इति॥ सह आस्रवैः सास्रवाः॥ न सन्त्यास्रवा एष्विति अनास्रवाः॥ सास्रवाश्च अनास्रवाश्चेति समासः॥ स्वसामान्यलक्षणधार
णाद्धर्माः॥ एष सर्वधर्माणां समासनिर्देश इति॥ तत्र कतमे धर्माः यदुत सास्रवाश्च अनास्रवाश्च न तद्व्यतिरिक्ता धर्माः॥ तत्किं तस्मादाह सर्वध

पृथक्त्वं विसंयोग इति॥ अप्रतिसंख्यानिरोधश्च प्रत्यर्थमिति समीक्ष्य वक्ष्यति॥ अस्यैकार्थं ब्रूते॥ बहुत्वं हि सति प्रतिसंख्याने ऽन्यतरस्य दिति पक्ष
स्याहि प्राप्य॥ नास्य कस्यचित् सभागहेतुरिति॥ सभागहेतुः सभागश्च प्रकारार्थो हेतुशब्दलोपात्॥ दृश्यते हि पदस्य पदैकदेशानुप्रयोगा
नावाक्यं वाक्यैकदेशात्॥ तद्यथा॥ सत्यभामा भामा देवदत्तो दत्तः॥ प्रविश पिण्डीं प्रविश तर्पणमिति॥ नित्यः खलु प्रतिसंख्यानिरोध
ः॥ तस्य किं सभागहेतुना प्रयोजनमिति॥ असभागहेतुरसभागः॥ नास्ति सभागोऽस्येत्यसभाग इति बहुव्रीहिसमासः॥ नासौ कस्य
चिदिति॥ नासौ प्रतिसंख्यानिरोधः कस्यचिदन्यस्य धर्मस्य सभागहेतुरित्यधिकृतं॥ किं कारणं॥ संस्कृतस्यैव सभागहेतुत्वमिष्यते॥
तत्र न सभागोऽस्य सभाग इति तत्पुरुषः॥ न तु नास्य कश्चित्सभागोऽस्तीति॥ न त्वस्य निरोधस्य कश्चिदन्यो निरोधः सदृशो न तवतीत्य
र्थः॥ उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया॥ अनागतानां धर्माणां उत्पादस्यात्यन्तं विघ्नः अत्यन्तविघ्नः अत्यन्तनियतनिरोधः॥ ७९
अन्य इति अप्रतिसंख्यानिरोधः॥ स हि प्रतिसंख्यानिरोधादनन्तरोक्तादन्योऽप्रतिसंख्ययेति प्रसज्य प्रतिषेधोऽयमकारः॥ न प्र
तिसंख्यया प्राप्य इत्यर्थः॥ अथवा पर्युदासः प्रतिसंख्याया यदन्यत् प्रत्ययवैकल्यं॥ तेऽप्रतिसंख्यया प्राप्यो निरोधोऽप्रतिसंख्यानि
रोधः॥ मध्यपदलोपात्॥ अयुक्तमेतत्॥ प्रत्ययवैकल्यं हि कारणं॥ कथमतो नभसि निरोधः प्राप्यत इति॥ औपचारिकत्वाददोषः॥ अ
थवाऽप्रतिसंख्यानिरोध इति॥ न प्रतिसंख्यानिरोधः अप्रतिसंख्यानिरोधः प्रतिसंख्यानिरोधादन्यत्वमात्रमवाच्यते॥ न तु प्रत्ययवैक
ल्यस्य व्यापार इति॥ उत्पादग्रहणं अनित्यनिरोधव्युदासार्थं अनित्यतानिरोधो हि धर्मस्थितिं न त्वेकविघ्नानं धर्माणामुत्पादस्य॥ अत्यन्तग्र

हष्टं त्वसंज्ञिनिरोधसमापत्त्योः संज्ञिकत्वप्रसङ्गात्॥ तानि च नागतानां चित्तचैतसानामुत्पादविघ्नाः॥ न त्वप्रत्ययतावत्कालिकत्वात्॥ तद्विघ्न
भावस्य॥ यस्त्वेकरूपव्यासक्तं चक्षुर्मनस्कारेति विस्तरः॥ यस्त्वेकस्मादाहरणकथनं॥ यस्त्वेकस्मिन्नीलरूपव्यासक्तं चक्षुर्मनसोऽन्यस्य स
एकरूपव्यासक्तं चक्षुर्मनः॥ तस्यानिरूपकत्वाधिपत्यसाधारणात् नीलादन्यानि नीलकानि पीतलोहितावदातादीनि च वर्णरूपाणि संस्थान
रूपाणि च शब्दगन्धरसस्प्रष्टव्यानि च सर्वाणि॥ अत एव प्रत्युत्पन्नमध्वानमतिक्रामन्ति॥ अतीतमध्वानं प्रतिपद्यन्त इत्ययं सूत्रार्थः॥ त
दालम्बनेऽपीति॥ तानि नीलकादीन्यनन्तकान्यनालम्बनानि तथापि तदालम्बनाः पञ्च विज्ञानकायाः॥ ते नैकत्र सूत्रस्मि
तिलावसाधनमतत्॥ न हि तत्समर्थमिति विस्तरः॥ न हि ते पञ्चविज्ञानकाया अतीते विषये स्वालम्बनमपि ग्रहीतुं॥ वर्त्तमाना
लम्बनत्वात् पञ्चानां विज्ञानकायानां॥ कथं पुनरिदानीं नीलकादिकं वर्त्तमानमालम्ब्य कस्मान्नोत्पद्यन्ते॥ न शक्यमवेदयितुं॥
सर्वधर्माणां चतुष्कनियतत्वात्॥ इतोऽपरस्याप्यालम्बनं चेति॥ यस्य विज्ञानस्य यदालम्बनं तदेव तस्यालम्बनं तद्वत् हत्वे
न्नोत्पादिति॥ आलम्बनप्रत्ययवैकल्यात् पञ्चविज्ञानकाया न पुनरुत्पद्यन्ते॥ अत आह॥ सत्येषामप्रतिसंख्यानिरोध इति वि
विस्तरः॥ तेषां पञ्चानां विज्ञानकायानां प्रत्ययवैकल्यात् प्राप्यते आलम्बनप्रत्ययवैकल्यात्॥ चतुर्भिर्न हि प्रत्ययैर्हेतुसमन
न्तरालम्बनाधिपतिप्रत्ययैश्चित्तचैता उत्पद्यमाना उत्पद्यन्ते॥ तेषामन्यतमवैकल्येऽपि नोत्पत्तिः॥ समनन्तरप्रत्ययवैकल्यादि
त्युपपन्नम्॥ समनन्तरप्रत्ययो हि तदानीं चित्तचैतलक्षणधर्मैकस्यैव तस्य नीलविज्ञानस्योत्पत्स्यमानस्यावकाशं ददाति॥ न त्वन्येषां नीलानन्ता

प्रबुद्धः प्रबुद्ध इत्यर्थः ॥ कर्मकर्तृत्वेन विधानमित्यत्र ॥ स्वयं बुद्धवान् इति बुद्ध इत्यर्थः ॥ कर्मण्यपि कर्तृविधानमप्यदोषं पश्यामः ॥ सर्वगुण
सम्पत्सम्पन्नतया सर्वदोषविनिर्मुक्ततया च बुद्धेन मैत्र्यावबुद्धा ज्ञाता इत्यर्थः ॥ भगवत इति द्वितीयपदापादानं । अनादत्तस्यावतानि
वृत्तमित्यर्थः निरुपपदानामभिधानानां हि लोके अनादरो भवति ॥ देवदत्तो देवदत्त इति ॥ विनयविलेषणानां चतुष्कोटिकं कुर्वन्ति ॥ अस्ति
बुद्धो न भगवान् प्रत्येकबुद्धः स्वयम्भूत्वाद् बुद्ध इति भगवत्त्वं तु न भगवान् अपरिपूर्णदानादिसम्भारत्वात् ॥ यो हि माहात्म्यवान् स भग
वानुच्यते ॥ अस्ति भगवान्न बुद्धश्चरमभविको बोधिसत्त्वः परिपूर्णदानादिपारमितत्वात् । अनभिसम्बुद्धत्वाच्च ॥ अस्त्युभयथा बुद्धो भग
वान् ॥ अस्ति नोभयथा एतानाकारान् स्थापयित्वेति ॥ अतो बुद्धं भगवन्तमित्युभयविशेषणं ॥ हतमस्यान्धकारमनेन वेति हतान्धकारः ॥ ष
ष्ठीबहुव्रीहिः ॥ मार्गेण हतमिति कर्तृता । मार्गेणास्य हतमित्यर्थः ॥ तृतीयाबहुव्रीहौ तु मार्गेणाधिकरणेन मध्याहार्य्यं ॥ अपर आह ॥ विग्रहद्वय २
प्रदर्शनं । हन हिंसागत्योरिति हतमित्यर्थः ॥ द्वयपरिग्रहार्थं ॥ यदा हतमस्यान्धकारमिति ॥ विग्रहः कृतस्तदा गत्यर्थो हन्तिर्गृह्यते गतमस्यान्ध
कारमित्यर्थः ॥ यदा पुनस्तृतीयाबहुव्रीहिः कृतस्तदा हिंसार्थो हन्तिर्गृह्यते ॥ हिंसितमनेनान्धकारमित्यर्थः ॥ उक्तं तु लक्षणया ॥ पदद्वयमेक
पद्यं कृत्वा पश्चात्सप्तमीतत्पुरुषं करोति ॥ सर्वस्मिन् हतान्धकारः ॥ सर्वे हतान्धकार इति ॥ तथा च सति हतशब्दोऽत्र न पूर्वं निपतति
सप्तमीसमासत्वे हि कृतलक्षणत्वादिति चिन्त्यं ॥ सप्तमी शौण्डैरिति समासः ॥ हतान्धकारशब्दः शौण्डादिषु पठ्यते । शौण्डादी
नामाकृतिगणत्वात् । तत्रास्यानुप्रवेशो द्रष्टव्यः ॥ सप्तमीति योगविभागाद्वा उत्सर्गेण वा समासः ॥ सहसुपेति सूत्रविभक्तिवर्द्धमानः सुव

नं स्तवकं न तत्समस्तनयग्रस्तमिति ॥ कृतनलक्षणः ॥ भावान्तसूक्ष्मामयन्नर्थसकादिसूक्ष्मार्थस्फुटनं न वा कथमुत्सर्गे मीलनमन्धकारे स
र्वस्मिन्निष्पन्नेनातिसंबध्यते ॥ सम्पन्नान्धकारमनेनातिसम्बध्यते ॥ अन्धकारघातहवनेनातिसम्बध्यते ॥ यन घनान्धकारघातनयागमहतवा
न्हतान्धकारः ॥ सनस्यान्धकारघातः ॥ सर्वाभावगन्तव्यः ॥ यथा [illegible] ॥ यन रथोर्ध्वलक्षणधनगुरधनयागमहन्तलोध[illegible] साक्षा
धानः ॥ एवमिहाप्यवगन्तव्यं ॥ अन्यथापि चेह समस्तवकं समासं पञ्चमः ॥ सर्वस्मिं हतं सर्वहतं । सर्वप्रकारेण सर्वहतं सर्वथा सर्वहतमस्या
न्धकारमनेनचेति ॥ सर्वथा सर्वहतान्धकारः ॥ एवं हतशब्दस्यान्धकारेण सामानाधिकरण्यं ॥ न च पूर्वनिपातः स्तुति ॥ सर्वप्रकारे [illegible] क्लि
ष्टाक्लिष्टान्धकारविगमः ॥ सर्वस्मिंल्लक्ष्य[illegible]लक्षणसर्वं सर्वमिति [illegible]वचनात् ॥ किम
त्र सार्वनेगमान्धकारशब्देनोच्यते ॥ [illegible] ॥ अज्ञानं हि तत्त्वार्थदर्शनप्रतिबन्धादन्धकारमिव गन्तव्यं ॥ अन्धकारशब्दो हि [illegible]गम
सिप्रसिद्धः ॥ अन्धमिव जनं करोतीत्यन्धकारः ॥ स हि घटपटादिरूपदर्शनप्रतिबन्धात् [illegible] साधर्म्यात् ॥ अज्ञानमप्यन्धकार[illegible]
तः ॥ तत्त्वार्थ[illegible]स्वादि[illegible]दर्शनप्रतिबन्धात् [illegible] अज्ञानं ॥ प्रतिपक्षलाभेनेति । आर्यमार्गलाभेन ॥ विपक्षक्षयः विपक्षप्रतिघाता
यपक्षः ॥ प्रतिपक्षसङ्गतिरुक्ता ॥ अथवा ज्ञानं ज्ञानाश्रयं । अज्ञानप्रतिपक्षः ॥ तस्य लाभेन ॥ अत एव सर्वथा ॥ सर्वग्रहण[illegible] सद्धिधर्मत्वा
त् । हतं [illegible]समुदाचारप्रहाणीकृतमित्यर्थः ॥ अगासा विति [illegible] भगवान् ॥ प्रपञ्चकञ्चुकं अवकाशस्य [illegible] सत्त्वा [illegible] पञ्चकञ्चुकशब्दः ॥ पूर्वनिपा
तः ॥ कामभिस्पन्दनार्थो [illegible] सर्वत्रेति ॥ [illegible] विगमात् [illegible] सर्वसांसारिकवस्तु [illegible] प्रपञ्चकञ्चुका नाम [illegible]

अभिधर्मकोश

चनीत्युपायेन संवर्णनं तस्माद् अयं स्कन्धकोऽभिधर्मः ॥ प्रज्ञामला सानुचराभिधर्म इत्यभिधर्मशास्त्रमतिप्रतं ॥ तत्र सानुचरं सानुचरमिति व्याख्यातं दः
कं चित् स्वभावत्स्वचित्स्वेतस्मिन् कलापे सहोत्पत्ता सानुचरमिति नानुवर्त्यन्ते ॥ आत्मादिसम्प्रयोगात् कश्चिद् अनुवर्त्यन्ते ॥ एकस्कन्धको ह्यस्याव
भिधर्मः ॥ द्विस्कन्धको वा ॥ तस्य च आत्मादयः संकीर्तिताः ॥ अस्य तु व्याख्यातम् अभिधर्म इति ज्ञानप्रस्थानं ॥ तस्य शरीरस्य पादाः ॥ प्रक
रणपादः विज्ञानकायः धर्मस्कन्धः प्रज्ञप्तिशास्त्रं धातुकायः संगीतिपर्याय इत्येतदपि शास्त्रं सानुचरम् एव ॥ पारमार्थिकः पारमार्थि
कोऽभिधर्म प्राप्तये याजिकोऽभिधर्मः तत्प्राप्तये ॥ उपपत्तिप्रतिलम्भिका हि प्रज्ञा शास्त्रं च आह तदर्थमनुसन्ति तस्याः प्राप्तये ॥ अस्या
मस्याश्चिन्तामयी चिन्तामय्याः सास्रवा भावनामयी तस्याश्चानास्रवा प्रज्ञा जायत इति अनुक्रमः ॥ तदर्थमिति ॥ तदधिगमाय उपन्यासः ॥ अयं स्व
लक्षणधारणात् ॥ धारणं निरुक्तिः पारमार्थिकः सांकेतिकोऽभिधर्मः ॥ परमार्थधर्ममिति परमस्य ज्ञानस्यार्थः परमार्थः परमो वार्थः प
रमार्थः सर्वधर्माग्रत्वात् परमार्थः ॥ परमार्थश्चासौ धर्मश्च परमार्थधर्मः ॥ धर्मलक्षणं चेति स्वसामान्यलक्षणधारणात् स्वलक्षणं पृथिवी धा १
तुः खक्खटत्वमित्येवमादि ॥ तत्प्रत्यभिमुखः प्रतिलम्भाय प्रतिवेधाय अभिवर्धनाय वा ॥ प्रत्यभिमुखो धर्मः ॥ अभिधर्मः ॥ कुगतिप्राद
यः इति तत्पुरुषसमासः ॥ ननु च लक्षणधारणात् प्रतीत्य इति मुख्य इति अनास्रवा ता वः प्राज्ञाप्तिप्रमाणः लक्षणं सहासमस्यते तदाय
यी ता वः ॥ तथा च आधुनिक अन्तरात् परमार्थत्वं परमार्थ अन्तराल प्रयत्नं अग्निना लक्षणतः सोऽग्निनस्य लक्षणं ॥ नत्वयं धर्मो न स्वलक्षणं ॥ किं तर्हि लक्षणः
स्वपर स्वाहि मुख्या तत् ॥ अभ्यासोपि सांकेतिकोऽभिधर्मः प्राप्युपायत्वात् तत्वानाय वा निर्वाणं धर्मलक्षणस्यापि प्रत्युपनिषद्भावनात् इत्युक्तः ॥

किमंग पुनराभिधार्मिकं शास्त्रं तत्पुरुषसमासेनाभिधर्म्म इति सिद्धं भवति॥ उक्तोऽभिधर्म इति॥ स्वभावतः शब्दनिर्वचनतश्च॥ अवयवार्थोऽयं वृद्धः
समुदायार्थस्तु न तावदित्युक्तः समुदायार्थं पृच्छति॥ इदं तु शास्त्रं कथमभिधर्म्मकोशमिति॥ तस्यार्थतोऽस्मिन्निति तस्याभिधर्मसंज्ञकस्य
शास्त्रस्यानन्तरोक्तस्य ग्रहणं॥ अर्थत इति न ग्रन्थतः॥ न व्यंजनतः॥ अस्मिन्नर्थतोऽयमनुप्रवेशोऽनेन साकल्येन॥ तस्माद्यदत्र प्रधानमित्यव्ययीभावः॥ अन्त
र्भूतः प्रविष्ट इत्यर्थः॥ ततश्चास्त्रं मदीयं तस्यार्थस्य कोशस्थानीयं भवति॥ कोशसदृशं॥ तस्मिन्नर्थे षष्ठीतत्पुरुषसमासः॥ अभिधर्मस्य
कोशोऽभिधर्मकोश इति॥ यद्यत्र प्रविशति तत्तस्य कोशः॥ अथवा सोऽभिधर्मो ज्ञानप्रस्थानादि तस्य मदीयस्य शास्त्रस्याश्रयभूतः॥
ततोऽर्थादभिधर्मादेतन्मदीयं शास्त्रं निराकृष्टं॥ अर्थतश्चाप्युद्धृतमतः स वाश्रयोऽस्याभिधर्म्मः कोशभूतस्तस्मिन्नर्थे बहुव्रीहिसमासः॥
अभिधर्म्मः कोशोऽस्येति॥ अभिधर्म्मकोशः॥ यतो ह्यसिर्निराकृष्यते तत्तस्य कोश इति॥ ततश्चास्त्रमभिधर्म्मकोशमिति॥ समुदाया
र्थोऽप्यस्यावगमितव्य इति सूचयति॥ किमर्थं पुनरभिधर्मोपदेशः॥ किं प्रयोजनमित्यर्थः॥ सप्रयोजनस्य हि शास्त्रस्य प्रणयनं साधुरेव तु
ननिः प्रयोजनस्याकथने चायं प्रथमत उपदिष्टः॥ केन चायमभिधर्मश्चादितो देशितः॥ योऽस्योपदिष्टः स हि शास्त्रस्य प्रमाणमर्हन्नपि स्या
दित्यभिप्रायः॥ प्रथमत इति विशेषणं॥ अन्यथा कात्यायनीपुत्रादीनां पिण्डीकरणे च पश्चादुपदेशनस्य सिद्धत्वात्॥ प्रथमत उपदेशने
हि विवादः॥ यत इति विषयः॥ यतः कारणात् शास्त्राचार्यः॥ अस्तु कारणः॥ अभिधर्म्मकोशं प्रणयन् अस्य वक्तुं प्रारब्धुमाद्रियत॥ आदरे
कारणमित्यर्थः॥ तदेवं कृतप्रकृतं यस्याभिधर्म्मशास्त्रस्य प्रयोजनं तन्मात्रकापदेशमनागतं प्रदर्शयन्नाह॥ २ ॥

धर्मत्वेन उत्पत्तिविघ्नबाधकत्वेन चावरणधर्मत्वात् ॥ अथवा यस्मान्नावरणधर्मबलक्षणं नान्यलक्षणं तदाकाशं ॥ तथाप्यन्यलक्षणमसी
तिनमौनिनाधवाकाशं ब्राह्मणः ॥ असर्वगतं तदाकाशं अनिर्देश्यं वा प्राप्तिः ॥ आवरणाभावो लाभात् · तस्माद् चालोकात् ॥ कुड्यादिषु रूपस्य
अनुपस्थानं भवतीति ॥ अत्र आकाशलक्षणे लाभात् ॥ आकाशालावप्रसङ्गः ॥ कुड्याद्यपगमे प्रवेशनस्य हि भवतीति अनिर्देश्यप्राप्तिः ॥ नानिर्देश्य
प्राप्तिः ॥ तत्रापि कुड्यादेः अवकाशदानादाकाशमस्त्येव ॥ यदि हि तत्राकाशं न स्यात् · तस्मिन्नेव कुड्यादेर्न नवकाशत्वादवस्थानं न स्यात् ॥ यत्र
तत्र रूपाकरस्यानवस्थाने · तत्कुड्याद्यावरणाभावात् आकाशलाभात् ॥ उक्तं हि भगवता ॥ पृथिवी ब्राह्मण अप्सु प्रतिष्ठिता ॥ पृथिवी ब्राह्मण अप्सु
आपः प्रतिष्ठिताः ॥ आपः ब्राह्मण वायौ प्रतिष्ठिताः ॥ वायौ प्रतिष्ठिताः ॥ वायुर्ब्राह्मण आकाशे प्रतिष्ठितः ॥ आकाशं प्रतिष्ठितः ॥ आकाशं ब्राह्मण
अप्रतिष्ठितं ॥ अतिसरसि महाब्राह्मण अतिसरसि महाब्राह्मण ॥ आकाशं ब्राह्मण अप्रतिष्ठितं अनालम्बनमिति विस्तरः ॥ तस्माद् १०
स्याकाशमिति वैभाषिकाः ॥ ५ ॥

प्रतिसंख्यानिरोधो यो विसंयोगः पृथक् पृथक् ॥ उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया ॥ ६ ॥

विसंयोग इति विश्लेषः अनित्यानि निरोधोऽप्रतिसंख्यानिरोधश्च अनयोर्दर्शने यत्नः ॥ नहि विसंयोगलक्षणो निरोधो विसंयुक्तिर्विसंयोगः
क्षणविसंयुक्तिलक्षणः ॥ संयोगप्राप्तिनियतनिरोधः संस्कारेण यो धर्मः स प्रतिसंख्यानिरोधः ॥ दुःखादीनामार्यसत्यानामिति विरक्षयः प्रति

ग्रहात्॥ प्रतिसंख्यानमनास्रवैव प्रज्ञा गृह्यते॥ न हि लौकिकं प्रज्ञा दुःखसत्याद्याकारा नाकिकः सूरूनाधन तस्मिंश्च कामूर्तानाप्रज्ञाविरागव
ष्टंतिविरमणय गृहतं॥ क्षणप्रकाशाकर्कर्यमार्गप्रज्ञाग्रहणार्थं॥ मनप्रज्ञाविरमणथप्राप्यानिरोधश्चेति॥ प्रतिसंख्यानिरोधः मध्यपदला
पंरूत्वमिति॥ शाकपार्थिवादीनामुपसंख्यानं॥ शाकप्रियः पार्थिवः शाकपार्थिव इति यथा मध्यपदलोपः॥ यदि प्रतिसंख्यानमनास्रवैव प्रज्ञा
गृह्यते लौकिकमार्गप्राप्यो निरोधो न गृहीत इत्युपव्याप्यलक्षणं प्राप्नोति॥ नाव्याप्ति॥ सर्वो हि ग्रैधातुकस्यास्रववल्गनिरोधोऽनास्रवयाप्र
ज्ञया प्राप्यते॥ न तु निरोधास्तिया लौकिकेनैव प्रज्ञया प्राप्यतेऽनानास्रवयेति॥ किं लौकिक्या प्रज्ञया प्रयोजनं॥ या हि लौकिकेन मार्गेणैक
प्रिश्चन्निरोधः प्राप्यते॥ स एव पुनर्लौकिकाद्रूनः प्राप्यत एवेति॥ लौकिकेनैव प्रज्ञाप्तकं न लौकिकी॥ इत्यसत् प्रतिसंख्यानिरोधः॥ स
स्वच तुषुस्य निर्देशं निर्दिशन्ता मार्गसत्यवदिति वेलाषिकाः॥ पृथक्पृथगिति नानास्वार्थः॥ यावन्ति हि संयोगद्रव्याणीति॥ संयुक्तः सं
योगः॥ संयोगाय द्रव्याणि संयोगद्रव्याणि संप्रयुक्तकर्माणि वा संयोगः॥ संयोगस्यार्थं द्रव्याणि वेति संयोगद्रव्याणि॥ सास्रवद्रव्याणी
ति यावद्भूतं भवति॥ सास्रवं हि द्रव्यं स्कन्धस्थानीयं संप्रयोजनं तत्स्थानीयं॥ पृङ्क्तस्कन्धं बलीवर्दस्थानीयमुच्यते गवलाकं॥ अन्यथे
त्ययथकमप्युक्तमर्थः॥ सर्वक्षणनिरोधः साक्षात्क्रियते समुदयादिदर्शनलावनाहेयक्षणनिरोधप्राप्तिरित्यर्थः॥ एतव प्रतिपक्षलाव
नाविपथ्यमिति॥ एवं समुदयादिदर्शनलावनाप्रहातव्या एकप्रतिपक्षयारभ्यसादनं निष्प्रयोजनमित्यर्थः॥ यदुक्तं कंसमसल
रग्मनिरोधश्चेति॥ कांकं॥ स प्र॥ पर्वतग्रीविणारखनगृहपतिनापृष्टयावर्मादिनयालिङ्करध्याकं॥ किं सकलस्यार्थे निरोधः॥ सकलगलो

पाद्धिसंस्कारानुपपत्तेर्द्रव्यान्तरमिति चेत्सिद्धान्तः॥ उत्पन्नस्य तत्र ग्रहणानन्तरं॥ वर्णसंस्कारस्य तत्र ग्रहणमतं॥ ज्ञानार्थं प्रयुक्तविधिर्नेन सम्यगर्थं भवति॥ वि
दज्ञानं भवति स्वधातौ लिङ्विकरणस्य तद्रूपं विधत्ते भवति॥ न तु विदः सत्तायामिष्टतस्य धातोः श्यन्विकरणस्य तद्रूपमित्यर्थः॥ ज्ञानेऽत्रालय
कानं प्रवर्तते न तु द्रव्ये॥ तन्मते त्यक्षणमिति वैनाषिकपरिहारः॥ कायविहितकार्ययितर्हि प्रसङ्गः स्यादित्यर्थः॥ न हि कायविहितफलो गृह्यमा
णायां वर्णे ग्रहणं प्रवर्तते॥ वैनाशिकानामयमभिप्रायः॥ नीलादिग्रहणसमानकालिकग्रहणं वा संस्कारनिरपेक्षं प्रवर्तते॥ कायविहितक्रियाग्र
हणं तु वर्णनिरपेक्षं॥ पचितिशब्दरूपायतनग्रहणं तु वर्णसंस्कारापेक्षं प्रवर्तते भवति॥ सौत्रान्तिकपाक्षिकस्त्वयमाचार्यो न तमर्थं प्रयच्छती
ति॥ न हि वाक्समनन्तसंस्कारग्रहणं॥ मानसेऽस्व तत्र विकल्पितं॥ वर्णसंनिवेशविरचनायत्तं वा हि संस्कारेण संस्कारेणाम द्रव्यं किंचिदस्ति॥ व
र्णग्रहणसंस्कारग्रहणमालावारं॥ तत्त्वकर्मकाण्डसंस्कारनपरीक्षितव्यं॥ सत्त्वासत्त्वाख्यातेत्यादि॥ वाग्विज्ञप्तिः अवदत्तप्रतिनिकाय्यत्र
र्थः॥ सत्त्वासत्त्वसंख्यातमित्यादिकश्चित्पठति अयमेवार्थो भवत्यभिप्रेतः॥ यदि हि सत्त्वासत्त्वसंख्यात उपात्त इति अयमर्थोऽभिप्रेतो भवत्॥ स १७
त्त्वाख्या वाग्विज्ञप्तिशब्दः असत्त्वाख्योऽन्य इति तदेवं वस्तु साधकं विवक्षितं निःप्रयोजनमेव॥ तस्मात्सत्त्वासत्त्वाख्येत्यादि पाठः स्फुटः पठितव्यः॥
उपात्तमहाभूतहेतुको भवति॥ प्रज्ञप्तस्तानीन्द्रियाविनिर्भागवर्तीनि भूतान्युपात्तानि॥ अन्यान्यनुपात्तानि॥ उपात्तानि महाभूतानि हेतुरस्य
ति उपात्तमहाभूतहेतुको यथा हस्तवाक्कृतः शब्दो भवति॥ यदि सत्त्वसंख्यात उपात्त इति प्रज्ञप्तो वाक्यपि हि निर्मितानां मानुषाकारादिहस्तवाक्कृतः शब्दः कुर्यात्
सत्त्वानुपात्तमहाभूतहेतुकः स्वरवावगत व्यपदिन्द्रियविनिर्भागवर्तित्वात्॥ स च मानुषीमपि वाचं निर्मातुं प्रवर्तते॥ वस्तुतीर्थकस्य रूपमाध

स्पर्शलक्षणं सर्वनिर्मितम्॥ एकस्य तु स्पर्शितस्य सर्वस्पर्शितवत्॥ तस्य च वाक्यनिर्मितशब्दस्यानुपात्तमहाभूतहेतुकत्वप्रसङ्गः॥ यथा वायु
वनस्पतिनदीशब्दवत्॥ यथा शब्दस्य दाहच्छेदार्थत्वात्॥ सत्वाख्यो वाग्विज्ञप्तिशब्दः ऽसत्वाख्योऽन्य इति॥ सत्वमाचष्टे सत्वाख्यः वाग्विज्ञप्तिश
ब्देन हि सत्वोऽयमिति विज्ञायते॥ तं वाग्विज्ञप्तिशब्दं वर्जयित्वाऽन्यः शब्दो हस्तशब्दोऽपि यावदसत्वाख्य एव॥ किमङ्ग असत्वसंतानजः शब्द इत्या
ह भवति॥ तदेवमुपात्तमहाभूतहेतुकः सत्वाख्यश्चासत्वाख्यश्च भवति॥ अनुपात्तमहाभूतहेतुकोऽपि निर्मितशब्दो वाग्विज्ञप्तिस्वभावः सत्वा
ख्यः तस्येव हस्तशब्दो वायुवनस्पत्यादिशब्दश्चासत्वाख्य इति॥ चतुर्विधः शब्दो मनोज्ञामनोज्ञभेदात् पुनरष्टविधो भवति॥ यथैकावधे
पत्रमाधृतिः इति॥ तत्र तु चतुष्टयमुपादाय वर्णः शब्दमुपादाय रूपं वायुवर्णः पत्रमाधृतिः इति तावत्॥ रसः षोढेति॥ षट्प्रभेदा इति म
धुरादिभेदेन॥ तस्य च षट्स्वन्योन्यसम्पर्कविकल्पात्तु बहुप्रकारा रसा भवन्ति॥ एककद्विकत्रिकचतुष्कपञ्चकषट्कसम्पर्कया
द्विवचनक त्रिषष्टीं रसा उपदिष्टाः॥ सुगन्धदुर्गन्धयोः समविषमगन्धत्वादिति॥ अनुत्कटोत्कटगन्धत्वादित्यर्थः॥ अस्मिन्पक्षे द्विविध
गन्धश्चतुर्विधः॥ त्रिविधस्तु शास्त्रे उक्त इति सुगन्धो दुर्गन्धः समगन्धश्चेत्यर्थः॥ अपरप्रकरणे पुनर्व्याचष्टे समगन्धश्चेति॥ तथा नवैकदेशाः इति स
वार्थो भवति॥ शब्दमात्रं तु हिंसकः॥ शीतमृदुत्वातिलाघवादिति सर्वे प्रत्यवमृश्यते॥ या धर्मदुःखातिलाघवं कर्पासतूलके॥ तेनामापादयन्तूपं॥
ग्रीष्मायत्यपि तत्र्करयोः जातीयत्वात् शीतमवगन्तव्यं॥ कारणे कार्योपचारादिति॥ अस्मिन् काजिघत्साचेतसि कायधर्मः तस्य
कारणं तत्कथं तस्य काये न्द्रियग्राह्यः स्पृष्टव्यतः॥ सा जिघत्सा नाम पादयत्नूपं॥ यथा बुद्धानां सुखमुत्पाद इत्यादि॥ अस्य तु दर्शयति यथा समु

यतिधर्म
का०

येन उस्योनुबन्धिनी स्वेन विशिष्यन॥ नमेवार्थं दर्शयन्नाह॥ विक्षिफा चिरुकस्यापीनि॥ अविक्षिफ चिरुकस्य विक्षफि वर्त्तमन्तूगिनानिभ
य४॥ विक्षफि नपिहिनस्य वर्त्तमविक्षिफ चिरुस्यापि तु वर्त्तमन्तूगिशया विक्षफि हिनस्यानि अविक्षफिस्वनूबन्धिनीनि विक्षफ विशि
ष्यन॥ नथा विक्षिफ चिरुकस्या विक्षफि वर्त्त तूनिनानिभय४॥ चिरुत्वेशु अपिहिनस्य वर्त्ततु उवक्त चिरुकस्यापि तु वर्त्तमन्तूनि अनिभय
४॥ नस्यहि चिरुत्वेशानि नूशा अविक्षफि स्वनूबन्धिनीनि चिरुत्वेरुस्या विशिष्यन॥ नदेवं धर्मी कस्न विरणयथार्थं अविक्षिफ चिरुशा विक्षिफ
चिरुकस्तीयरु नस्यनेकनापि भवं चानिधीयन॥ अन्न उवचापि भवेदना विक्षिफ स चिरुकस्यापी स्यकमाचार्यस॥ नूतीयरु न त्वानूा॥ उन
नथाप्यपि भवेदना विक्षिफ चिरुकस्यापी स्वा विक्षफ नूस चिरुकस्यापीनि वा॥ नयथा॥ त्रयालोकमनूष्या४॥ उकाधनवानूजननाव पिधनमा
त्रवकी नावनि समीक्ष्य विक्षफ मित्रस्य वनमस्ती सुकनाक द्विनीयावक्ता रवनू॥ दवदरुयस्तु दरुयानपिधनमस्ती सूपि भवेदन विक्षफ मित्रस्या
प्यस्तीनि॥ दवदरु यस्तु दरु गगन द्विनमिवायन्ननापि भवेदन स उवविक्षफ मित्रात्वमन नत्व वस्त्व न तूस्पर्थ४॥ गगनना त्रापि भवेद्याधिकरुणं
नद्वदिह्यपिद्रष्टव्यं॥ यस्तू ननन दक्कन चिरुकं चाधिकरुणूलान विक्षफ स्यनू वरक्षाविरणनीयस्तूनि नदपि नक्किञ्चिद् विक्षफि ज्ञानिमधिकरु
णेनस्तु रुधंप्रद्यीनं॥ सा चा विक्षफि ज्ञानिप चिरुकस्य रवनीनि उनाव विवक्षिन॥ किमनन विरक्षपिनन॥ त्वदीयपि विक्षफि लरु धरु लु
विक्षफ नूवस्थान चिरुकम धिकरुस्य नविरमषिन४॥ रुनापि विसनारणपि चिरुत्व चिरुशा स्वस्यचयनू॥ ब्याकरुणप्रनिपन्नूपंसाध विक्षफि नि
ष्यनवंशनि॥ उवा च विक्षफि संरुनाकरुणले वा विक्षफि न चिरुकस्य संरवनीनि॥ चतुर्थंकाण्डस्ला नह्यपयिष्यन॥ यन्त्रापनिपमि त्रिवरुविरण २१

यितमिति तदपि यथादर्शयिष्यामः॥ सप्रतिघादनन्तरूपित्वरूपत्वात्॥ दर्शनवत्तत्वः सप्रतिघार्थरूपत्वाभावात् अविज्ञप्तिर्धर्मधातुपतिता पठिता सा
त्वप्रतिघाति सत्त्वाति॥ तस्मादिदमास्माकीनमवगन्तव्यं रूपमविज्ञप्तिः किल रूपमिति॥ तदवास्तु॥ ११ ॥

भूतानि पृथिवीधातुरप्तेजोवायुधातवः॥ धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः॥ १२ ॥

भूतानि पृथिवीधातुरित्यादि विस्तरः॥ धातुग्रहणं वर्णसंस्थानात्मक पृथिव्यादिनिवृत्त्यर्थं॥ स्वलक्षणधारणादुपादायरूपधारणाद्धातव इति॥ काठिन्यादि
स्वलक्षणं चक्षुराद्युपादायरूपं च दधतीति धातवः॥ महाभूतान्येव तु स्वसामान्यलक्षणधारणान्महाभूतानीत्यर्थे वा इत्यर्थः॥ अन्यथार्थमन्यस्य चक्षुरा
उपदर्शनार्थं पुनरेव वीप्सार्थे वा इत्यर्थः॥ एवं भूतानीति कस्मात् महत्त्वं सर्वोपादायरूपाश्रयत्वेनौदारिकत्वादिति॥ सर्वोपादायरूपाश्रयत्वेन मह
त्त्वादित्यर्थः॥ तद्भूतवृत्तिस्थितिर्महान्तो भूतात्मक वृक्षादिकार्येषु॥ तत्र महद्भूतरूपः पृथिव्यप्तेजोवायुस्कन्धस्तेषां महात्त्वा
नां महासन्निवेशत्वात् महान्ति भूतानीत्युक्तानि॥ धृत्यादिकर्मसंसिद्धा इति॥ धृत्यादिकर्मसंसिद्धा इति॥ धृत्यादिकर्मनिर्देशः॥ पृथि
व्यादिस्वरूपानुमानार्थं॥ उपलादिके हि पृथिवीद्रव्यसंग्रहं पक्तिव्यूहनदर्शनात् जलतेजोवायूनामस्तित्वमनुमीयते॥ ...
...कर्मदर्शनात् पृथिवीतेजोवायूनामस्तित्वं॥ ... चलनदर्शनात् पृथिव्युदकवायूनामस्तित्वं॥ वायोः सं
धारणधर्मत्वात् स्पर्शदर्शनात् पृथिव्यप्तेजसामस्तित्वमिति वेदितव्यं॥ व्यूहनं पुनर्वृद्धिः प्रसर्पणं चेति॥ वृद्धिः सन्तानविकृतावुपचयो...

अभिधर्म
कोश

वस्तुरिति संधिवचनात्। सौत्रान्तिकदर्शनेन च प्रज्ञप्तिसत्त्वादस्य। नहि तेषां संस्कृतवस्तुकमनयोः परिच्छेद्यत्वेन निरोधमार्गसत्यान्त-
पि तर्हि न संस्कृतवस्तुनि तेन परिच्छेद्यस्यात्। इदं स्वसमुदयसत्यस्य सम्बन्धेन सद्भावात् तयोः परिच्छेद्यत्वं व्यवस्थाप्यते। तथा हि योगिनः व-
चिन्तयन्ति। अस्यास्य हेतुकस्य इदं स्वस्य कालनिरोधः केनचिदुपायेन सम्भवति प्राप्यत इति। निरोधमार्गसत्त्वेऽपि परिज्ञानन्ति। न त्वाकाशम-
प्रतिसंख्यानिरोधमपि इदं स्वेन सम्बन्धस्येति न तयोः परिज्ञानन्ति। प्रयोगावस्थायां तु लौकिकेन ज्ञानेन तावपि सामान्यरूपेण सर्वधर्मा अनात्मा-
न इति तावत् व्यवस्यन्ति। धर्मायतनधात्वाख्या इति। आयतनं च धातुश्च आयतनधातुः धर्मश्चासौ आयतनधातुश्च धर्मायतनधातुः। तदाख्या येषां
ते इमे धर्मायतनधात्वाख्याः। के वेदनासंज्ञासंस्कारस्कन्धाः। सहाविज्ञप्त्यासंस्कृतैश्चेति। सहाविज्ञप्त्या सहासंस्कृतैश्चाकाशादिभिः।
आयतनदर्शनायां धर्मायतनमिति। धातुदर्शनायां च धर्मधातुरिति। सप्त द्रव्याणीति। अविज्ञप्तिर्वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्क- २५
न्धः। आकाशं प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधश्चेति॥ १५ ॥

विज्ञानं प्रतिविज्ञप्तिः मन आयतनं च तत्। मताः धातवः सप्त षड्विज्ञानान्यथो मनः॥ १६ ॥

विज्ञानं प्रतिविज्ञप्तिरिति विज्ञानस्कन्धः। प्रतिविज्ञप्तिरित्यर्थः स्कन्धाधिकारात्। प्रतिर्वीप्सार्थः। विषयं विषयं प्रतीत्यर्थः। उपलब्धिर्व-
स्तुमात्रग्रहणम्। वेदनादयस्तु चैतसा विशेषग्रहणरूपाः। षड्विज्ञानकाया इति षड्विज्ञानसमूहाः। षड्विज्ञानान्यथो मन इति। षड्वि-

ज्ञानधातवो याथासंख्येन। यच्च चक्षुर्विज्ञानं स च चक्षुर्विज्ञानधातुः॥ एवं यावद्यन्मनोविज्ञानं स मनोविज्ञानधातुः॥ तमस्कानिखिलानि षड्म
नोधातुरिति वेदितव्यं॥ १६ ॥

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः॥ षष्ठाश्रयप्रसिद्ध्यर्थं धातवोऽष्टादश स्मृताः॥ १७ ॥

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मन इति॥ षण्णामिति निर्द्धारणे षष्ठी एषामेव संख्यानादित्यर्थः॥ अनन्तरग्रहणमन्यविज्ञानव्यवहि
तनिरासार्थं॥ षष्ठीयस्यानन्तरमन्यविज्ञानाव्यवहितं तस्याश्रयः॥ व्यवहितं तु न तस्याश्रयः॥ अन्यस्यासावाश्रयो यस्यानन्तरं व्यव
हितं॥ अत एव चाचित्तिकावस्थायां चित्तातीतमपि समापत्तिप्रवेशचित्तं व्युत्थानचित्तस्याश्रयो भवति॥ विज्ञानान्तराव्यवधानात्॥ अ
तीतग्रहणं प्रत्युत्पन्ननिरासार्थं॥ मनोविज्ञानं हि आश्रयितस्यामवस्थायां प्रत्युत्पन्नमनन्तरातीतमिष्यते॥ तदेव च न इष्यते॥ ष
ष्ठाश्रयप्रसिद्ध्यर्थमिति॥ विज्ञानग्रहणं वेदनाद्यनन्तरातीतनिरासार्थं॥ यद्धि तन्मन इति ज्ञापितनिर्देशान्न बीजाद्याश्रयात् एव क्षेत्रो
ऽस्य पदार्थो विधीत्स्या बीजाद्याश्रयात्॥ यदनन्तरं निरुद्धं विज्ञानं तन्मनोधातुरिति॥ तद्यथा स एव वर्णितविस्तरः॥ तद्यथा स
एव पुत्रोऽन्यस्य पिताख्यां लभते॥ तदेव फलमन्यस्य बीजाख्यां॥ तथेहापि स एव चक्षुरादिविज्ञानधातुरन्यस्याश्रय इति मनोधात्वा
ख्यां लभते॥ सप्तदश धातवो भवन्ति षाड् भवति॥ य एव षड्विज्ञानधातवः स एव मनोधातुः॥ य एव च मनोधातुस्त एव च षड्विज्ञान

अभिधर्मकोश

कं भगवतेति॥ तद्ध्यानं स्थानान्तरगतमित्यभिप्रायः॥ कथमिति॥ आध्यात्मिकमिति॥ विज्ञानाश्रयभूतत्वमर्थः॥ आत्मशब्देन हि चित्तमात्मेत्यु-
पचर्यत इति वक्ष्यति॥ आत्मनि अधि अध्यात्मम् अध्यात्ममेवाध्यात्मिकं॥ आत्मनि चित्तलक्षणे कर्तव्ये॥ इह तु निश्रयमर्थमाध्यात्मिकशब्देनायत
विज्ञानाश्रयमिति यावदुक्तं भवति॥ अथवा यानीति विस्तरः॥ अथवा यानीति विस्तरः॥ अथवा तच्छब्देन षडिन्द्रियाण्यभिसंबध्यन्ते॥ च-
क्षुर्विज्ञानं श्रोत्रविज्ञानमित्येवमादिप्रवचनप्रसिद्धमतः॥ न तु रूपविज्ञानं शब्दविज्ञानमिति॥ लोके तु कदाचिदेवं भवेत्॥ तस्मादि-
दं व्याख्यानान्तरमाश्रीयते॥ तस्मादाह॥ एवं चक्षुरादिप्रकरणग्रन्थोऽप्यनुवृत्तो भवतीति विस्तरः॥ कथमित्यसिद्धमसिद्धेन साध्यते॥ चक्षु-
